Digvrata and Deshavrata Limiting one's activities in all directions for the whole life time and limiting one's activities within certain boundaries for a limited time

These are not merely religious vows They are of much economical importance. A person who practises these vows has to depend upon things of his own place or village or limited area He cannot send for

things from outside, nor send out things from his place. He has to depend upon his own people. In a village if the majority of the people begin to practise this vow the village, out of necessity, has to become a self supporting unit and the people would feel self-contented and self sufficient The advice of Mahatma Gandhi to boycot foreign goods was perhaps based upon this vow, fully conversant of Jaina vows as he was.

This is not a difficult vow to practise Even to-day we find in South India some villages where the Jainas depend entirely on their own village products and manufactured things

It is further enjoined that the gift of food of medicine, of learning and of protection should be given to the deserving and to the needy If these vows are strictly followed on a wide scale without any transgressions, social inequality and economic distress will soon vanish and all people will have enough food, clothing, shelter and comfort

JAINAM JAYATU SHASANAM

जैनदर्शनसार:

प्रथमोऽध्याय:

॥ मङ्गलम् ॥

श्रीमंतं सन्मतिं सिद्धं नत्वा सद्गतिदायकम् ।
जैनदर्शनसाराख्यं निबंधमभिदध्महे ॥

ग्रन्थ-संगति:

आत्मनः परमहितप्रतिपादनं जैनदर्शनस्य प्रयोजनं । तस्य परमहितं तु मोक्षः । स एव परमपुरुषार्थः । मोक्षस्तु आत्यंतिकाऽव्याबाधसुखस्वरूपः । स तु न केवलाज्ज्ञानान्नापि ज्ञाननिरपेक्षाच्चारित्रान्नापि एतद्द्वयानपेक्षाद् दर्शनादपि तु समुदितैरेभिः त्रिभि. सम्यक्त्वविशिष्टैः प्राप्यते । तथाचोक्तं तत्त्वार्थाधिगमे मोक्षशास्त्रे सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः १।१।

सम्यग्दर्शनं हि आत्मेतरविवेकरूपं । आत्मेतरविवेकस्तु तत्त्वार्थश्रद्धानात् समुपलभ्यते । तत्वार्थाश्च जीवाजीवास्रवबंधसंवरनिर्जरामोक्षाख्याः सप्त । जीवश्चेतनालक्षणोऽजीवस्तद्विपरीतः । पुण्यपापागमद्वाररूप आस्रव. । आत्मकर्मणोरन्योन्यप्रदेशानुप्रवेशात्मको बंधः । आस्रवनिरोधलक्षणः संवरः । कर्मैकदेशसंक्षयात्मिका निर्जरा । कृत्स्नकर्मविप्रमोक्षलक्षणो मोक्षः ।

जीवतत्त्वविवेचनम्

जीवति प्राणिति चतुर्भिरिन्द्रियबलायुःश्वासोच्छ्वासाख्यैः प्राणै-र्व्यवहारेण, निश्चयनयेन तु स्वचेतनात्मकस्वभावेन, स जीवः, स एवात्मशब्देनाप्युच्यते। जीवोऽयमुपयोगमयोऽमूर्तिः कर्त्ता, स्वदेहपरिणामः, भोक्ता, ऊर्द्ध्वगतिस्वभावश्च। तस्य द्वौ भेदौ, संसारस्थो मुक्तश्चेति। तथा चोक्तं द्रव्यसंग्रहे:—

जीवो उवओगमओ, अमुत्ति कत्ता सदेहपरिणामो।
भोत्ता संसारत्थो सिद्धो सो विस्ससोड्ढगई॥

"जीवसिद्धिः चार्वाकं प्रति, ज्ञानदर्शनोपयोगलक्षणं नैयायिकं प्रति, अमूर्त्तजीवत्वं भट्टचार्वाकद्वयं प्रति, कर्मकर्तृत्वस्थापनं सांख्यं प्रति, स्वदेहप्रमितित्वं नैयायिक-मीमांसक-सांख्यत्रयं प्रति, कर्मभोक्तृत्वसिद्धिः बौद्धं प्रति, संसारस्थत्वं सदाशिवं प्रति, सिद्धत्वं भट्ट-चार्वाकद्वयं प्रति, ऊर्द्ध्वगति-स्वभावकथनं माण्डलिकग्रन्थकारं प्रति इति मतार्थो ज्ञातव्यः"

अधुनैतेषां जीवस्वभावानां प्रत्येकं संक्षेपतो वर्णनं क्रियते–

उपयोगमयत्वं—उपयोगमयत्वं हि दर्शनज्ञानस्वभावात्मकत्वं। दर्शनज्ञानस्वभावातिरिक्तजीवलक्षणस्याभावात्।

ननु ज्ञानं प्रकृतेर्धर्मः कथं तस्य जीवस्वभावत्वमिति न वाच्यम्, तस्य प्रकृतिधर्मत्वाभावात्। तस्या अज्ञत्वात्। आत्मनश्चेतनत्वात् तस्यैव ज्ञत्वात्। चेतनत्वज्ञत्वयोरविनाभावात्। न च मुक्तात्मनि

ज्ञानाभावाच्चेतनत्वज्ञत्वयो र्न व्याप्तिरिति वक्तव्य, मुक्तात्मनोऽनन्तदर्शनज्ञानोपयोगमयत्वात् ।

अमूर्तित्व—मूर्तिर्हि रूपादिसंस्थानपरिणाम । न च स जीवस्यास्ति, तस्य रूपरसगन्धस्पर्शात्मिकत्वाभावात् ।

ननु चात्मनः पृथिव्यादिचतुष्टयात्मकत्वाद् रूपाद्यात्मकत्वमिति चेन्न । अचेतनेभ्यश्चैतन्योत्पत्त्ययोगात् । न चात्मनि पृथिव्यादिगुणाधारणोरणाद्रवोष्णतालक्षणोऽन्वयो दृश्यते । यदि भूतचतुष्टयात्मकत्वमात्मनः स्वीक्रियेत तर्हि तद्दिनजातबालकस्य स्तनादावभिलाषाभावप्रसंगः स्यात् । अभिलाषो हि प्रत्यभिज्ञाने सति भवति, प्रत्यभिज्ञानं च स्मरणे, स्मरणं चानुभवे भवतीति पूर्वानुभव सिद्धः । मध्यदशायां तथैव व्याप्तेः । अन्यथा पूर्वजन्मस्मृतिर्न स्यात् । मृतानां रक्षोयक्षादिकुलेषु स्वयमुत्पन्नत्वेन कथयतां दर्शनाच्च सनातन आत्मा सिद्धः तथा चोक्तं—

> तदर्हजस्तनेहातो रक्षोदृष्टेर्भवस्मृतेः ।
> भूतानन्वयनात् सिद्धः प्रकृतिज्ञः सनातनः ॥

तथा च न तदानीमेव पृथिव्यादिचतुष्टयसंयोगादात्मन उत्पत्तिर्युक्तिपथप्रस्थायिनी । कर्मबंधापेक्षया व्यवहारनयमाश्रित्योपचारतस्तस्य मूर्तिमत्त्वस्वीकारे तु न काचन क्षतिः । तथा चोक्तं—

> वण्ण रस पंच गंधा दो फासा अट्ठ णिच्चया जीवे ।
> णो संति अमुत्ति तदो ववहारा मुत्ति बंधादो ॥

कर्तृत्व—व्यवहारनयादयमात्मा ज्ञानावरणादीनां पुद्गलकर्मणां घटपटादीनां च, अशुद्धनिश्चयनयाद् रागद्वेषादीनामशुद्धभावानां, शुद्धनिश्चयनयाच्च स्वकीयशुद्धभावानां कर्त्ता। आत्मनो यदि कर्तृत्व नांगीक्रियेत तर्हि तस्य भोक्तृत्वमपि न स्यात्। न च कर्तृत्व-भोक्तृत्वयोः कश्चन विरोधः, अन्यथा भोक्तुर्भुजिक्रियायाः कर्तृत्व न स्यात्। नचान्यस्य कर्तृत्वमन्यस्य भोक्तृत्वमन्यथा कृतनाशा कृताभ्यागमप्रसंग. स्यात्, ततः आत्मनः कर्तृत्व तर्कसिद्धम्।

स्वदेहपरिमाणत्व—यावदय कर्मभिर्न विमुच्यते तावत् स्वकर्म-विपाकवशात् ससार एव परिभ्रमति। कदाचिन्मनुष्य., कदाचिद्देव. कदाचिन्नारकः, कदाचिच्च तिर्यक्षु समुत्पद्यते। हिंसाऽसत्यस्तेयाब्रह्म-परिग्रहाख्यैरशुभैस्तद्विरतिरूपैः शुभैश्च भावैः पाप पुण्य च समुपार्ज्य शोभनाशोभनशरीर लभते। यादृशमणुमहद्वा शरीर विन्दति तावत्प्रमाण.प्रदेशसंहारविसर्पवत्वात् प्रदीपवत् सकोचविकास-शाली भवति। पिपीलिकाशरीरस्थ एवात्मा यदा हस्तिशरीरमाप्नोति तदा तत्प्रमाणो भवति। तथा च नात्मा व्यापकः।

ननु आत्मा व्यापको द्रव्यत्वे सति अमूर्तत्वात्, इत्यनुमानात्तस्य व्यापकत्वं सिद्ध्यति इति चेन्न, अत्र यदि रूपादिलक्षणं मूर्तत्वं तत्प्रतिषेधोऽमूर्तत्व. तदा मनसा व्यभिचारः, अथासर्वगतद्रव्यपरिमाण मूर्तत्व, तत्प्रतिषेधस्तथा चेत्, परं प्रति साध्यसमो हेतुः। यच्चापर-मनुमानमात्मा व्यापकः अणुपरिमाणानधिकरणत्वे सति नित्यत्वात्। तदपि न समीचीनं। आत्मनः सर्वथा नित्यद्रव्यत्वाभावात्। नित्यस्य क्रमाक्रमाभ्यामर्थक्रियाविरोधात्, तस्य कथचिन्नित्यानित्यात्मकत्व।

द्रव्यापेक्षया हि तस्य नित्यत्वं पर्यायापेक्षया चानित्यत्वम्। जैनदृष्टौ सर्वेषां पदार्थानां परिणामिनित्यतास्वीकरणात। अणुपरिमाणा-नधिकरणत्वमपि पर्युदासप्रसज्यपक्षाभ्यां चिंत्यमान न सौरथ्य-माभजतीति ज्ञातव्यम्।

नाप्यात्मा वटकणिकामात्र, कमनीयकांताकुचजघनादिसस्पर्श-काले प्रतिलोमकूपमाह्लादनाकारस्य सुखस्यानुभवात्। तस्य वट-कणिकामात्रत्वस्वीकारे सर्वाङ्गीणरोमाञ्चादिकार्योदयायोगात्। आशा तचक्रवदाशुवृत्या क्रमेणैव तत्सुखमिति नोपपत्तियुक्त। परापरान्तः-करणसम्बन्धस्य तत्कारणस्य परिकल्पनायां व्यवधानप्रसगात्। यदि परापरांतःकरणयोगो न स्वीक्रियेत तर्हि सुखस्य मानसप्रत्यक्षत्वं न स्यात्।

न च स्वदेहप्रमितिरात्मा इत्यत्रापि प्रमाणाभावात् सर्वत्र संशय इति वाच्य। तत्साधकस्यानुमानस्य सद्भावात्। तथाहि देवदत्तात्मा तद्देह एव तत्र सर्वत्रैव च विद्यते, तत्रैव तत्र सर्वत्रैव च स्वासाधारणगुणाधारतयोपलम्भात्। यो यत्रैव यत्र स्वासाधारणगु-णाधारतयोपलभ्यते, स तत्रैव तत्र सर्वत्रैव च विद्यते। यथा देवदत्त गृह एव तत्र सर्वत्रैव चोपलभ्यमान स्वासाधारणभासुरत्वादि गुण· प्रदीपः तथा चाय तस्मात्तथेति। आत्मनोऽसाधारणगुणाश्च ज्ञानदर्शनसुखवीर्यलक्षणास्ते च सर्वाङ्गीणास्तत्रैव चोपलभ्यते। तथा चाहुः—

सुखमाह्लादनाकारं, विज्ञानं मेयबोधनम्।
शक्तिः क्रियानुमेयास्याद्यूनः कांतासमागमे॥

तस्मादात्मा स्वशरीरप्रमाण एव युक्तिसमर्थितः। न चात्मेंद्रिय-मनोरूपः, द्रव्येंद्रियद्रव्यमनसोः पुद्गलात्मकत्वेन जडत्वात्। इंद्रियादिविनाशेपि आत्मनोऽवस्थानात्।

भोक्तृत्वं—यथाऽयमात्मा स्वकर्मणां स्वकीयभावानां च कर्त्ता तथैव तेषां फलभोक्ताऽपि। व्यवहारनयात् स पौद्गलिककर्मफल प्रभुक्ते निश्चयनयस्तु आत्मनश्चेतनभाव। यद्यन्य कर्ता स्यादन्यश्च भोक्ता स्यात् तदा स्वय कृत कर्म निरर्थक भवेत् प्रयत्नश्च सर्वोऽपि निष्फलः स्यात्।

ऊर्ध्वगतिस्वभावत्व—वस्तुतोऽयमात्मा ऊर्ध्वगतिस्वभावः कर्मबंधनपारतंत्र्यात्तु यत्र गंतु कर्म प्रेरयति तत्रैव गच्छति। यदा तु चतुर्भिः प्रकृतिप्रदेशस्थित्यनुभागाख्यैर्बंधे, सर्वतोमुक्तो भवति तदा स्वभावत ऊर्ध्वमेव व्रजति। कर्मबद्धस्तु जीवः स्वस्वकर्मानुसार विदिशातिरिक्तां गतिं लभतेऽनुश्रेणि।

इत्थ जीवत्वादिस्वभावे समर्थित एषः जीवो द्विविधः ससारस्थः सिद्धश्च। यो मिथ्यादर्शनज्ञानचारित्रैर्नानायोनिषु संसरति स संसारी। संसारी जीवः स्थावरत्रसभेदेन द्विविध.। तत्र पृथिवीजलते-जोवायुवनस्पतयः स्थावरा। कृम्यादयो द्वीन्द्रियत्रींद्रियचतुरिंद्रिय पंचेंद्रियाः त्रसाः। पंचेंद्रियाअपि समनस्काऽमनस्कभेदेन द्विप्रकारा.। जीवानां चतुर्दशजीवसमासचतुर्दशमार्गणाचतुर्दशगुणस्थान-विकल्पैरपि अनेकभेदा भवंति। ते च सर्वे परमागमादूह्याः जीवस्याऽय संसारित्वभेदोऽशुद्धनयादेव। शुद्धनयात्तु सर्वे जीवा. शुद्धाएव।

सिद्धत्व—जीवोऽयं गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्रै-

भावितात्मा बाह्याभ्यन्तरद्विविधेन तपसा समुपात्तशक्तिः श्रुत-ज्ञानाविचलपर्यायात्मकेन शुक्लध्यानाग्निना निर्दग्धकर्मेन्धनो यदा समुपात्तमनुष्यशरीरं परित्यज्य चरमशरीरात् किंचिन्न्यूनपरिणामो लोकाग्रस्थाने सिद्धत्वं प्राप्नोति तदा तस्याष्टकर्मविनाशादष्टौगुणाः प्रादुर्भवंति—ज्ञानावरणक्षयादनंतज्ञानं दर्शनावरणक्षयादनन्तदर्शनं, अन्तरायक्षयादनंतवीर्यं, वेदनीयक्षयादव्याबाधत्वमिंद्रियजनितसुखाभावो वा, मोहनीयक्षयात् परमं सम्यक्त्वं सुखं वा। आयुः क्षयात् परमसौक्ष्म्यमुत्पत्तिमरणाहतिर्वा। नामक्षयात् परमावगाहनममूर्तत्वं वा। गोत्रक्षयादगुरुलघुत्वमुभयकुलाभावोवा।

अथ जीव एवात्मशब्देनाऽपि प्रोच्यत इति पूर्वमुक्तं। अध्यात्म-भाषया एष आत्मा त्रिविधोऽप्यस्ति बहिरात्मा, अन्तरात्मा, परमात्मा-चेति। शरीरादौ य आत्मबुद्धिं करोति स बहिरात्मा, तद्विपरीतो जातात्मेतरविवेक अन्तरात्मा, विमुक्तकर्ममलकलङ्कश्च परमात्मा प्रोच्यते। परमात्मा साध्यः अंतरात्मा च साधनं बहिरात्मा तु हेयः। न चैतेषु त्रिषु आत्मसु द्रव्यार्थादेशात् कोपि भेदोऽस्ति। पर्यायार्था-देशात्तु भेदः स्पष्ट एव। एक एवात्मा पर्यायेण त्रिरूपः प्रोच्यते। यथा मनुष्यत्वापेक्षया सर्वे मनुष्याः समानाः। राजापि मनुष्यो रङ्क-श्चापि मनुष्यो, न कश्चन तत्र भेदोऽस्ति। मनुष्यगणनावसरे सामान्ये नैव सर्वेषां गणना विधीयते। तथैव आत्मत्वसामान्येन नैते कथ-नापि भेदमर्हन्ति। सर्वेष्वात्मसु परमात्मत्वाविर्भावशक्तिर्विद्यते। केवलं तदभिव्यक्तिकरणाय प्रयत्नोऽपेक्ष्यः। नचात्मेश्वरात्को भिन्न आत्मा। परमात्मन एवेश्वरत्वात्। एष भेदस्तु कर्मकृतः। यथा

शुद्धाशुद्धकांचनयोः किट्टकालिकादिकृतः भेदः। एतदपसरणे तु निखिलमपि कांचनं समानमेव। तथैवात्मान अपि सर्वे समानाः तत्र कर्मापसरणे।

ये त्वात्मनो नरनारकादिपर्यायकृत जातिकुलादिकृत शरीरकृत च भेद वास्तविकं मन्यते, ते मूढा बहिरात्मान एव। न तेषां कदाचनापि मुक्तिः स्यात्। तथा चोक्तं पूज्यपादेन महामनसा—

बहिरात्मेंद्रियद्वारैरात्मज्ञानपराङ्मुखः
स्फुरितश्चात्मनो देह-मात्मत्वेनाध्यवस्यति।
नरदेहस्थमात्मान-मविद्वान् मन्यते नरम्।
तिर्यञ्च तिर्यगङ्गस्थं सुराङ्गस्थ सुर तथा
नारकं नारकाङ्गस्थं न स्वय तत्त्वतस्तथा।
अनतानंतधीशक्तिः स्वसवेद्योऽचलस्थितिः।

कर्मबंधनबद्ध एवात्मा यदा गुरूपदेशादभ्यासात्स्वसंवित्तेश्च स्व-परांतर विजानाति तदा मोक्षाभिमुखो भवति। स एव च संसार-सौख्यमोक्षसौख्ययोर्वस्तुतोऽन्तरमनुभवति। तदैव तस्य स्वानुभूतिः प्राप्ता भवेत्।

का स्वानुभूतिरिचेत् मनोविश्रांत्यात्मिकः स्वोत्थसुखास्वाद एव सेति। एतादृशीमनुभूतिमनुभवत्यंतरात्मा।

वस्तुतस्तु बाह्यगुरूपदेशो निमित्तमात्रं। तत स्वयमेवात्मना स्वोत्थाने बद्धपरिकरेण भवितव्यम्। अन्यथा बाह्यनिमित्त न किंचि-दभिलषित पुष्णाति। निमित्तान्यन्वेषयतो जना लौकिकार्थेऽपि न

कृतार्था भवंति किं पुनरलौकिकार्थे। आत्मोत्थान चाविद्याविनाशात् अविद्याविनाशश्च स्वकीयज्ञानमयज्योतिषा। तदेवाविद्याभिदुरं। तस्यैव पृच्छा कर्तव्या मुमुक्षुभिस्तस्यैवान्वेषणां दर्शनं च। तेनैवाऽयमात्माऽविद्यामयं पररूपं विनाश्य विद्यामयं स्वकीयरूपं प्राप्नुयात्। तथा चाहुर्महर्षयः—

> अविद्याभिदुरं ज्योतिः परं ज्ञानमयं महत्,
> तत् प्रष्टव्यं तदेष्टव्यं तद्द्रष्टव्यं मुमुक्षुभिः।
> तद्ब्रूयात् तत्परान् पृच्छेत् तदिच्छेत् तत्परो भवेत्,
> येनाविद्यामयं रूपं त्यक्त्वा विद्यामयं व्रजेत्।

यश्चात्मविमुखोऽविद्वान् पुद्गलद्रव्यमभिनंदति तदेवचात्मसात् कर्तुं प्रयतते। तत्संयोगे हर्षति तद्वियोगे च दुःखीयति तदेव च स्वात्मोन्नतिकारणमभिमन्यते तस्य बहिरात्मनः तत्कर्मनोकर्मरूपं पुद्गलद्रव्यं चतुर्गतिषु न कदाचिदपि सामीप्यं मुंचति। तस्य यत् किंचित् सौख्यं भवति तत् कर्माधीनमनात्मतंत्रं, सांतं, दुःखविमिश्रितं पापबीजं च। अतो बहिरात्मत्वं विहायान्तरात्मत्वलब्धौ प्रयत्नो विधेयः। स एव धर्म्यशुक्लध्यानबलेनोत्तरोत्तरमात्मगुणस्थानान्यारोहति। बहिरात्मा तु प्रथमं मिथ्यादृष्टिगुणस्थानमेव नातिक्रमते। कर्मचेतनाकर्मफलचेतनाविष्ट एष ज्ञानचेतनाविरहितः कर्मकरणे कर्मफलभोगे चासक्तः न कदापि शान्तिमधिगच्छति। अन्तरात्मा तु ज्ञानचेतनाभावितान्तःकरणः सम्यग्दृष्टिः कर्दमास्तहेमकमलवत् निर्लेपः स्वात्मानंदमनुभवति।

अंतरात्मा त्रिविध असंयमी, संयमासंयमी, संयमी च । तत्र । चतुर्थगुणस्थानवर्तीसमुपलब्धस्वरूपाचरणसामर्थ्योऽपि चारित्रमोह-कर्मोदयात् यावत् संयमं गृहीतुं समर्थो न भवति तावदसंयमी अंतरात्मा प्रोच्यते । धृतैकदेशसंयमः स्वात्मानुभूतिकुशलः पंचम-गुणस्थानवर्ती श्रावकस्तु संयमासंयम्यन्तरात्मपदवाच्यः । इमौ द्वौ धर्म्यध्यानेन स्वसंस्कारं कुरुतः । षष्ठगुणस्थानादारभ्य द्वादशगुणस्थान-पर्यंत सप्तगुणस्थानेषु संयमिनोऽतरात्मानो भवंति । एते हि विजित-सकलचारित्रमोहकर्माणः सप्तमगुणस्थानांतं धर्म्यध्यानेन ततः परं शुक्लध्यानेनात्मशुद्धितत्पराः उपशांतक्षीणमोहप्रकृतयः स्वात्मा-नुभवं कुर्वंति । स्वात्मानुभवस्तु रागद्वेषोपरमादिष्टानिष्टकल्पना-भावात् स्वात्मावस्थानं । पंचपरमेष्ठिषु त्रय: परमेष्ठिनः आचार्योपा-ध्यायसाधवः अंतरात्मान एव ।

परमात्मा द्विविधो सशरीरोऽशरीरश्चेति तयोरेकत्ववितर्कविचा-राभिधद्वितीयशुक्लध्यानेन विनष्टज्ञानावरणदर्शनावरणमोहनीया-न्तरायाख्यचतुर्घातिकर्मा समवाप्तलोकालोकप्रकाशककेवलावबोधः त्रयोदशचतुर्दशगुणस्थानवर्ती तीर्थंकर इतरो वा केवली सशरीरपर-मात्मा कथ्यते तस्यशरीरेण-सहितत्वात् । एष त्रयोदशगुणस्थान-वर्ती सदेहपरमात्मैव तीर्थं प्रणौति भव्यान भवाम्भोधितारकं धर्ममु-पदिशति । सकलसुरासुरनरेंद्रसेवितचरणाब्जः एषोऽनंतज्ञानदर्शन-सुखवीर्याख्याऽनंतचतुष्टयसमन्वितात्माऽर्हत्, जिनेंद्र, आप्त, इत्यादि शब्दैः व्यवह्रियते अर्हयोग्यत्वात् अरिहननाद्रजोरहस्य-हरणाच्च परिप्राप्तानंतचतुष्टयस्वरूपः सन् इंद्रादिनिर्मितामतिशयवती-पूजामर्हतीतिनिरुक्तिविषयत्वात्-कर्मजेतृणां सम्यग्दृष्ट्यादीनाम-

धीशत्वात्, आगमेशित्वाच्च। अयमपि सयोगायोगकेवलिभेदेन द्विविधः।

अशरीरपरमात्मनस्तु पूर्वोक्ताः सिद्धा एव।

अजीव तत्त्वम्

आत्मतत्त्वातिरिक्तं यत् किंचिद् दृश्यमदृश्यं चास्ति तत् सर्वमजीवतत्त्व प्रोच्यते। प्रामुख्येनैतदद्वयमेवतत्त्वम्। अवशिष्टानि आस्रवादीनि पंचतत्त्वानि तु एतद्द्वयनिमित्तकानि। तदजीवतत्त्वं पचविध। पुद्गलो धर्मः अधर्मः आकाशं कालश्च। पूर्वोक्त जीवतत्त्वमिमानि पञ्च च मिलित्वा षड्द्रव्याणीति प्रोच्यते, गुणपर्ययवत्वात् सत्त्वाद्वा। सत्त्वं चोत्पादव्ययध्रौव्यात्मकत्वात्। के गुणाः कश्चपर्याय इति चेत्, सहभाविनो गुणाः क्रमभाविनश्चपर्यायाः। अत्रैषामजीवद्रव्याणां संक्षेपतो विवेचनं विधीयते—

पुद्गलद्रव्य—रूपरसगंधस्पर्शवत्त्वं पुद्गलत्वं। यत् किंचित् स्पृश्यते रस्यते गन्ध्यते दृश्यते श्रूयते वा तत्सर्वं पुद्गलात्मकमेव।

नन्वस्तु स्पर्शरसगंधवर्णानां पुद्गलात्मकत्वं शब्दस्यतु आकाशगुणत्वात् कथं पुद्गलत्वमितिचेन्न, शब्दो नाकाशगुणः मूर्तिमत्वात्। ननु अमूर्तः शब्द इतिचेन्न मूर्तिमद्ग्रहणावरोधव्याघाताभिभवादिदर्शनात् शब्दस्य मूर्तिमत्वात्। शब्दो हि मूर्तिमता इंद्रियेण गृह्यते, मूर्तिमता कुड्यादिनाचाव्रियते, मूर्तिमता प्रतिकूलवाय्वादिना तस्य व्याघातो भवति, बलीयसा ध्वन्यंतरेण तस्याभिभवो दृश्यते इति, तस्य मूर्तिमत्त्वं तर्कसिद्धं ततश्च पुद्गलत्वं।

तथैव पुण्यपापाख्यस्य कर्मणोऽपि पुद्गलात्मकत्वमेव। स्यादेतत् कर्मणः पुद्गलात्मकत्वमसिद्धमात्मगुणत्वात्तस्येति न वक्तव्यं, तस्यात्मगुणत्वाभावात्। किं कारणमितिचेत्-अमूर्तेरनुग्रहोपघाताभावात्। यथाकाशममूर्तं दिगादीनाममूर्तानांनानुग्राहकमुपघातकं च, तथैवामूर्तं कर्माऽमूर्तेरात्मनोरनुग्रहोपघातयोः हेतुर्न स्यात्।

ननु पुण्यपापाख्यमदृष्टं धर्माधर्मनाम्ना प्रोच्यमानं कर्म आत्मगुण एवेति चेन्न, अदृष्टस्यात्मगुणत्वासंभवात्। यदि तत् आत्मगुणः स्यात्तदा न कदापि तस्य संसारहेतुत्वं भवेत्। न च स्वगुण एव कस्यचिद् बंधहेतुर्दृष्टः श्रुतो वा। अन्यथा न कदापि तस्य मुक्तिः संभवेत्। अतः कर्मणः पौद्गलिकत्वमवाङ्गीकार्यं। तथैव तमश्छाया तपोद्योतादीनामपि पौद्गलिकत्वमेवेंद्रियग्राह्यत्वात्।

पुद्गलस्य संक्षेपतो द्वौ भेदौ, अणुस्कन्धभेदात्। प्रदेशमात्रभाविस्पर्शादिपर्यायप्रसवसामर्थ्येन अण्यन्ते शब्द्यन्ते इति अणवः। अणवो हि सूक्ष्मत्वादात्मादय आत्ममध्याः आत्मान्ताश्च। स्थूलभावेन ग्रहणनिक्षेपादिव्यापारस्कन्धनात् स्कन्धा इति संज्ञायते। यद्यपि द्व्यणुकादयः केचित् स्कन्धाः ग्रहणनिक्षेपणादिव्यापारायोग्यास्तथापि रूढौ क्रिया क्वचित् सती उपलक्षणत्वेनाश्रीयत इति तेष्वपि स्कन्धाख्या प्रवर्तते। कथमनयोरुत्पत्तिरितिचेत्—अणवो हि भेदादेवोत्पद्यन्ते। स्कन्धास्तु केचिद् भेदात्, केचित्संघातात्, केचिच्च आभ्यामेताभ्यां, अन्यतो भेदेन अन्यस्य च संघातेन इति। यस्तु स्कन्धोऽचाक्षुषः स भेदसंघाताभ्यां चाक्षुषो भवति। सत्यपि तद्भेदे अन्यसंघातात् सौक्ष्म्यपरिणामपरित्यागे स्थौल्यो-

त्पत्तौ चाक्षुषो भवति ।

ननु पुद्गलानां बन्धोत्पत्तौ कोहेतुरिति चेत्—एतत् स्निग्धरूक्ष-गुणादेवैतेषां बन्धो भवति । स्निग्धत्वं हि चिक्कणगुणलक्षणास्तस्य पर्यायः तद्विपरीतपरिणामो हि रूक्षत्वं एष बन्धो द्व्यधिकगुणयोः पुद्गलयोर्भवति, न चैतन्न्यूनाधिकयोः बन्धे च सति द्व्यधिकगुणः स्कन्धः स्वपारिणामिको भवति, यथा क्लिन्नो गुडोऽधिकमधुररस परीतानां रेणवादीनां स्वगुणोत्पादनात् पारिणामिकः इति ।

धर्माधर्मद्रव्यसिद्धि—धर्मद्रव्यलक्षणं—जीवपुद्गलानां गतिरूपपरि-णतानामुदासीनतया गतिहेतुत्व यथा जलं मत्स्यगमने । अधर्म-द्रव्यलक्षणं च तेषां तथैवं स्थितिरूपपरिणतानां स्थितिहेतुत्व यथा पथि गच्छतामातपक्लान्तानां छाया । न चैमौ धर्माधर्मौ तेषां गतिस्थित्योः प्रेरकौ अपितु स्वयं तथापरिणममानानां तेषामुदासीनौ हेतू । अतएव तुल्यबलत्वात्तयोर्गतिस्थितिप्रतिबंधारेकाऽपि निरस्ता ।

ननु प्रमाणाभावादनुपलब्धेश्च न धर्माधर्मद्रव्यास्तित्वमितिचेन्न अनुमानतस्तयोरस्तित्वसिद्धेः । तथाहि—विवादापन्नाः सकलजीव-पुद्गलाश्रयाः सकृद्गतयः साधारणबाह्यनिमित्तापेक्षा युगपद्भाविगति-त्वात्, एकसरः सलिलाश्रयानेकमत्स्यगतिवत् । तथा सकलजीव-पुद्गलस्थितयः साधारणबाह्यनिमित्तापेक्षा युगपद्भाविस्थितित्वात् एक कुण्डाश्रयानेकबदरादिस्थितिवत् । यः साधारणं निमित्तं स धर्मोऽ धर्मश्च । ताभ्यां विना तद्गतिस्थितिकार्यस्यासंभवात् ।

परस्परं पदार्थाः गतिस्थितिपरिणामहेतवः इति चेन्न, परस्परा-

श्रयप्रसंगात्। ननु पृथिव्यादय एव साधारणनिमित्तानि गतिस्थित्यो इतिचेन्न, गगनवर्तिपदार्थगतिस्थितीनाम् तदसंभवात्। ननु नभ एव साधारणा निमित्तं तद्योस्तु इतिचेन्न, तस्यावगाहनिमित्तत्वप्रतिपादनात्। तस्यैकस्यैवानेककार्यनिमित्तताथामनेकसर्वगतपदार्थ परिकल्पनानर्थक्यात्। कालादिकार्याणामपि नभोनिमित्तकत्वोपपत्तेः। यदि कार्यविशेषात् कालादीनां भिन्नत्व तर्हि धर्मादीनामपि, सर्वथा विशेषाभात।

यच्चोक्तमनुपलब्धेरिति तन्न, अन्यथा सर्वेषामनुपलब्धानामसिद्धिप्रसगस्ततो धर्माधर्मद्रव्यास्तित्वसिद्धिः। इमे च धर्माधर्मद्रव्ये न पुण्यपापात्मके, ततः सर्वथाभिन्नात्मकत्वात। पुण्यपापं हि पौद्गलिकमिमे चापौद्गलिके निष्क्रिये च, इमे हि लोकाकाशे सर्वव्यापके। ननु धर्माधर्मयोः निष्क्रियत्वात् जीवपुद्गलानां गतिहेतुत्व नोपपद्यते। क्रियावतामेव जलादीनां मत्स्यादीनां गतिहेतुत्वदर्शनात्। नैष दोषः बलाधाननिमित्तत्वात्। एते हि गतिस्थितिपरिणातानां बलाधानं कुर्वतः न तु स्वय प्रेरयतः।

आकाशद्रव्यम्—यस्मिन् सर्व पदार्थाः अवकाशमाप्नुवंति तदाकाशं। आकाशं सर्वेषामाधारः धर्मादयश्चाधेयाः। यदि धर्मादीनां लोकाकाशमाधार आकाशस्य कः आधारः इति। आकाशस्य नास्ति कश्चनान्यः आधारः तस्य स्वप्रतिष्ठत्वात्। यथाकाश स्वप्रतिष्ठं धर्मादीन्यपि स्वप्रतिष्ठान्येव। अथ धर्मादीनामन्य आधार कल्प्यते आकाशस्याप्यन्यः आधार कल्प्यः, तथा सत्यनवस्थाप्रसंगः इति नायं दोष, आकाशादन्यस्याधिकपरिणामस्य द्रव्यस्याभावात्

कुत्राकाशं तिष्ठेत्। सर्वतोऽनन्तं हि तत्, ततो धर्मादीनामधिकरणमाकाशमित्युच्यते। तदपि व्यवहारनयवशात्। एवंभूतनयापेक्षया तु सर्वाणि द्रव्याणि स्वप्रतिष्ठान्येव। अत्राधाराधेयकल्पना साध्यं फलं त्वेतावन्मात्रमेव यद्धर्मादीनि लोकाकाशाद् बहिः न संतीति।

ननु लोके पूर्वोत्तरकालभाविनामाधाराधेयभावो दृष्टः यथा कुण्डे बदरादीनां। न तथाऽकाशं पूर्वं धर्मादीनि चोत्तरकालभावीनि अतो न व्यवहारनयापेक्षयाऽपि आधाराधेयकल्पनोपपत्तिः। नैष दोषः युगपद्भाविनामप्याधाराधेयभावदर्शनात् यथा घटे रूपादयः शरीरे हस्तादयः।

एतदाकाशं द्विविधं लोकाकाशमलोकाकाशं च। यत्र धर्मादीनि द्रव्याणि लोक्यंते तल्लोकाकाशं, ततो बहिः सर्वतोऽनंतमलोकाकाशं। अथ लोकालोकविभागस्तु धर्माधर्मास्तिकायसद्भावात् ज्ञातव्यः। एतद्द्रव्याभावे गतिस्थित्योरभावाल्लोकालोकविभागो न स्यात्। तस्मादुभयसद्भावाल्लोकालोकविभागस्थितिः।

एतानि चत्वारि अजीवद्रव्याणि पूर्वोक्तं जीवद्रव्यं च मिलित्वा पंचास्तिकायाः प्रोच्यते, प्रदेशबहुत्वात् काया इव कायाः। धर्माधर्मैकजीवानामसंख्येयप्रदेशत्वात्, आकाशस्यनंतप्रदेशत्वात्, पुद्गलानां च संख्येयाऽसंख्येयाऽनंतप्रदेशत्वादिति। प्रदेशः किं लक्षणा इति चेत्—यावदाकाशं परमाणुना (अविभागिना पुद्गलांशेन) अवष्टब्धं तावत् प्रदेश इति कथ्यते। स तु प्रदेशः सर्वाणुस्थानदानार्हः।

कालद्रव्यम् - कालोहि वर्तना लक्षणः। यः स्वयं परिवर्तमानानां वस्तूनां परिवर्तनायां निमित्तकारणं भवति स एव कालः। पदार्था- हि स्वयं परिणमंते न च कालस्तान् परिवर्तयितुं प्रेरयति अपि- तूदासीनतया तत्र कारणं भवति। एष कालो द्विविधः परमार्थकालो व्यवहारकालश्च। व्यवहारकालोहि द्रव्यपरिवर्तनरूपः अयमेव मुख्यः कालः। एषोऽसंख्यकालाणुरूपः तेचासंख्यकालाणवोनिष्क्रि याः प्रत्येकमेकैकस्मिन् लोकाकाशप्रदेशेऽवस्थिताः सति रत्नराशिवत् परस्परासबद्धाः।

व्यवहारकालस्तु परिणामादिलक्षणः। द्रव्यस्य धर्मान्तरनिवृत्ति- धर्मान्तरोपजननरूपोऽपरिस्पन्दात्मकः पर्यायः परिणामः जीवस्य क्रोधादिः पुद्गलस्य वर्णादिः धर्माधर्माकाशानामगुरुलघुगुणवृद्धिहानि कृतः। आदिशब्देन क्रिया परत्वापरत्वे च गृह्येते। एष व्यवहार- कालस्त्रेधाव्यवतिष्ठते भूतो वर्तमानो भविष्यन्निति। तत्र परमार्थकाले कालव्यपदेशो मुख्यः, भूतादिव्यपदेशोगौणः। व्यवहारकाले च भूतादिव्यपदेशोमुख्यः, कालव्यपदेशो गौणः क्रियावद् द्रव्यापेक्षत्वात् कालकृतत्वाच्चेति।

ननु पुद्गलाणुवत् कालाणुनामपि कथं न अस्तिकायत्वमिति चेन्न मुख्यवृत्त्या उपचारतोऽपि वा कालाणुनामस्तिकायत्वासंभवात्। एकस्य पुद्गलाणोस्तु यद्यपि मुख्यवृत्त्यास्तिकायत्वं नास्ति तथापि नानास्कंधप्रदेशापेक्षयोपचारतस्तस्याऽस्तिकायत्वाभिधानं। पुद्गलाणुः कदाचित् स्कंध संबद्ध आसीत् तादृशोभविष्यति वा। कालाणोस्तु न तादृशोपचारसंभावना तस्य सर्वदा पृथगवस्थानात्।

ननु जीवादीनि षड्द्रव्याणि भवद्भिः प्रोक्तानि परं नैतत् परिगणनमविकलम् द्रव्यस्य पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनोभेदेन नवविधत्वादिति चेन्न, पृथिव्यप्तेजोवायुमनांसि पुद्गलद्रव्येऽन्तर्भवंति, रूपरसगन्धस्पर्शवत्त्वात्। वायुमनसोरूपादियोगाभाव इति न वाच्य। वायुस्तावद्रूपादिमान् स्पर्शवत्वाद् घटवत्। चक्षुरादिकरणग्राह्यत्वाभावाद्रूपाद्यभाव इति चेत् परमाणवादिष्वपि रूपाभाव स्यात्। मनो द्विविधं, द्रव्यमनो भावमनश्च। तत्र भावमनो ज्ञान तस्यात्मगुणत्वादात्मन्यन्तर्भावः। द्रव्यमनश्च रूपादियोगात् पुद्गलद्रव्यविकार'। रूपादिवन्मनः ज्ञानोपयोगकरणत्वाच्चक्षुरिन्द्रियवत्। ननु अमूर्त्तेऽपि शब्दे ज्ञानोपयोगकरणत्वदर्शनाद् व्यभिचारी हेतुरिति चेन्न, तस्य पौद्गलिकत्वात् मूर्तिमत्त्वोपपत्तेः। ननु यथा परमाणूनां रूपादिमत्कार्यत्वदर्शनाद्रूपादिमत्व न तथा वायूनां मनसां च रूपादिमत्कार्यं दृश्यते इति चेन्न तेषामपि तदुपपत्तेः। सर्वेषां परमाणूनां सर्वरूपादिमत्कार्यत्वप्राप्तियोग्यत्वाभ्युपगमात्। न च केचित् पार्थिवादिजातिविशेषयुक्ताः परमाणवः सन्ति। जातिसङ्करेणारम्भदर्शनात् दिशोऽप्याकाशेऽन्तर्भावः। आदित्योदयाद्यपेक्षया आकाशप्रदेशपंक्तिषु इत इदमिति व्यवहारोपपत्तेः।

आस्रवबंधसंवरनिर्जरामोक्षतत्त्वम्।

एतानि पंचतत्त्वानि पूर्वोक्तजीवाजीवतत्त्वद्वयनिमित्तकानि। ननु तत्त्वानामेतत्क्रमस्य कोहेतुरितिचेत् सर्वस्यफलस्यात्माधीनत्वादौजीवग्रहणम्। तदुपकारार्थत्वात्तदनंतरमजीवाभिधानं। तदुभय विषयत्वात्तदनंतरमास्रवग्रहणम्। तत्पूर्वकत्वात् तत्पश्चाद्बंधवचनम्।

कृतसंवरस्यबंधाभावात् तत्प्रत्यनीकप्रतिपत्त्यर्थं तदनंतरं संवरोक्तिः। संवरे सति निर्जरोपपत्तेः तदनुनिर्जराभिधानम्। अन्ते प्राप्यत्वान्मोक्षस्यान्ते वचनं कृतम्। यद्यपि जीवाजीवयोः सर्वेषामेषां पञ्चानामन्तर्भावः कर्तुं शक्यस्तथापि संसारमोक्षतद्धेतुप्रतिपत्तिप्रयोजनार्थाय पृथङ् निर्देश आवश्यकः।

नहिं पुण्यपापयोरपि पृथग्ग्रहणं कर्तव्यमिति न वाच्यं। पुण्यपापयोरास्रवबंधभेदमात्रत्वात्। अत्रास्रवबंधयोः संसारहेतुत्वं संवरनिर्जरयोश्च मोक्षहेतुत्वमनुसंधेयम्।

आस्रवतत्त्वम्—आत्मनो येन परिणामेन पुण्यपापरूपं कर्म आस्रवति स परिणामः तत्कर्मागमनं चास्रव उच्यते। पूर्वोभावास्रवः अपरश्च द्रव्यास्रव इति अयं द्विधोऽप्यास्रवः प्रत्येकं साम्परायिकेर्यापथभेदाद्द्विविधः। मिथ्यात्वाविरतिप्रमादकषाययोगाः स्वोत्तरभेदविशिष्टाः परिणामाः भावास्रवत्वेन परिगण्यते तद्धेतुककर्मपुद्गलानामागमनंच द्रव्यास्रवत्वेन।

ननु प्रत्येकशः कर्मणामास्रवकारणं किमिति चेत् ज्ञानदर्शनोपघातान्तरायमात्सर्यादीनि ज्ञानावरणदर्शनावरणास्रवकारणानि। दुःखशोकतापाक्रंदनवधपरिदेवनादयोऽसद्वेद्यस्य, भूतव्रत्यनुकंपादानक्षान्तिशौचादयः सद्वेद्यस्य धर्माद्यवर्णवादो दर्शनमोहस्य, कषायोदिततीव्रपरिणामश्चारित्रमोहस्य, बह्वारंभपरिग्रहत्वं नारकायुषः, माया तैर्यग्योनस्य, अल्पारंभपरिग्रहत्वं मानुषायुषः, सरागसंयमादयः सम्यक्त्वंच दैवस्य, मनोवाक्कायकौटिल्यमन्यथाप्रवृत्तिश्चाशुभशरीरादिनामकर्मणः, तद्विपरीतं शुभस्य नामकर्मणः, दर्शनविशुद्ध्यादयः

षोडशभावना: तीर्थंकरत्वस्य, परनिंदात्मप्रशंसादयः नीचगोत्रस्य, तद्विपर्ययो विनम्रवृत्त्युत्सेकाभावश्चोच्चगोत्रस्य, दानादिविघ्नकरणं चान्तरायस्यास्रवकारणम्।

बंध-तत्त्वम् - येन चेतनभावेन कर्म बध्यते स भावबंधः, द्रव्यबंधस्तु कर्मात्मप्रदेशानां परस्परानुप्रवेशः। द्रव्यबंधस्य चत्वारो भेदाः प्रकृतिस्थित्यनुभागप्रदेशाख्याः। तत्र प्रकृतिप्रदेशबंधौ कायवाङ्मनसां-क्रियात्मकाद् योगात्, स्थित्यनुभागौ तु कषायाद्भवतः। वस्तुतस्तु-कषाय (क्रोधादि) एव बंधकारणं तस्यैवं कर्मस्थितिकर्मफलशक्ति हेतुत्वात्। कषायाभावे तु एकादशादिगुणस्थानेषु कर्मबंधाभावात् तत्र हि केवलं योगनिमित्तकं कर्मास्रवति न च तत्रात्मना सह कर्म तिष्ठति फलं वा किंचित् प्रददाति अत एव स ईर्यापथ इत्युच्यते। *प्रथमादिदशगुणस्थानेषु तु कषायसद्भावात् सांपरायिको बंधः।* अत एव स सांपरायिक इत्युच्यते। संपरायः कषायः अथवा संपराय संसारः, संपरायः पराभवो वा तत्प्रयोजनं कर्म साम्परायिकम्।

ननु तत्त्वार्थे मिथ्यात्वाविरतिप्रमादकषाययोगानां बंधहेतुत्वमुक्तं। द्रव्यसंग्रहादिषु च तेषां भावास्रवत्वम्। वस्तुतः एते भावास्रवाः सन्ति बंधहेतवो वा। अपि च कुत्रचिद् योगकषाययोरेव बंधहेतुत्वं, कुत्रचित् मिथ्यात्वाविरतिकषाययोगानां, कुत्रचिन्च पूर्वोक्तपंचानां बंधहेतुत्वम्। एतत् सर्वं कथमिति चेदित्थं:—

आस्रवो हि बंधहेतुर्भवति। तस्य बंधपूर्वपर्यायत्वादिति भावास्रवाणां मिथ्यात्वादीनां बंधहेतुत्ववचने कानुपपत्तिः। भावास्रवा हि द्रव्यबन्धनिमित्तकारणानि भावबंधस्य चोपादानकारणानि।

यच्च बंधहेतुसंख्यानां विभिन्नत्वं तत्र तु केवलं विवक्षावैचित्र्यमेव-कारणम्। बंधस्य हि चतस्रो विशेषता भवति, पूर्वोक्ताः प्रकृतिस्थित्यनुभागप्रदेशाख्याः। तत्र प्रकृति प्रदेशबंधयो कारणं योगः स्थित्य-नुभागयोश्चकषाय इति संक्षेपतो द्वयमेवाश्यकं बंधकारणम्। विस्तरतस्तु गुणस्थानक्रमापेक्षया पूर्वोक्तं चतुष्टयं पञ्च वा कारणानि भवंति। मिथ्यात्वाविरतिप्रमादानां वस्तुतः कषायस्यैव भेदत्वात्।

संवरतत्त्वम्—पूर्वोक्तकर्मास्रवनिरोधे आत्मनो यः परिणामः कारणं भवति स भावसंवरः। द्रव्यसंवरश्च तेषां कर्मास्रवाणां-निरोधः। गुप्तिसमितिधर्मानुप्रेक्षापरीषहजयचारित्राणि भावसंवरस्य भेदाः। एतेषां समवधाने मिथ्यात्वादिभावास्रवाणामभावात्। गुप्त्या-दीनां सम्यग्दर्शनाद्यात्मकत्वात् मिथ्यात्वादीनां प्रतिपक्षत्वम्। कस्मिन् गुणस्थाने कासां प्रकृतीनां संवरो भवतीति ग्रंथान्तराद् बोद्धव्यम्।

निर्जरातत्त्वम्—पूर्वसञ्चितं कर्मपुद्गलद्रव्यं येनात्मपरिणामेन यथा कालं भुक्तरसं भूत्वा विशीर्यते सा भावनिर्जरा। एषा सविपाक-भावनिर्जराऽपि प्रोच्यते। यत्तु कर्मपुद्गलद्रव्यं तपसा विशीर्यते साऽ विपाकभावनिर्जरा। तेषां कर्मपुद्गलानामात्मनोगलनञ्च द्रव्यनिर्जरा इति कथ्यते। यथैवागामिनां कर्मणां संवरो विपक्षस्तथैव सञ्चितानां विपक्षा निर्जरा भवति।

मोक्षतत्त्वम्—सर्वेषां कर्मणां क्षयहेतुर्य आत्मनः परिणामः स भावमोक्षः। कर्मणामात्मनः पृथग्भवनं तु द्रव्यमोक्षः। कः सर्वकर्म-क्षयहेतुरितिचेत्—व्यवहारनयात् सम्यग्दर्शनज्ञानचारित्रलक्षणरत्न-त्रयमेव मोक्षस्य कारणम्। निश्चयनयात्तु तत्त्रयमयो निजात्मैव।

यत आत्मानं विहाय न कुत्राप्यन्यस्मिन द्रव्ये रत्नत्रयं वर्तते ततः रत्नत्रयमय आत्मैव मोक्षस्य हेतुरनुसधेयः ।

ननु तत्त्वार्थश्रद्धानात् समुपलभ्यमानात्मेतरविवेकरूप सम्यग्दर्शन तु प्रतिपन्न किंतु सम्यग्ज्ञानसम्यक्चारित्रयोः स्वरूपं तु न निर्ज्ञातमिति तत्स्वरूप प्रोच्यतामितिचेच्छृणु—

संशयविपर्ययानध्यवसायरहित साकारमात्मपरस्वरूपस्य ग्रहणं सम्यग्ज्ञान । सम्यकचारित्र तु अशुभाद् विनिवृत्ति. शुभे प्रवृतिर्वा व्रतसमितिगुप्तिरूपा । एतच्च व्यवहारनयमाश्रित्य । निश्चयनयात्त सम्यग्ज्ञानिनो बाह्याभ्यतरक्रियानिरोधसमुत्पन्नात्मशुद्धिविशेषः सम्यक्चारित्र कथ्यते । बाह्यक्रिया हि हिंसादिपञ्चपापानि, अभ्यन्तरक्रिया च योगकषायौ । मनोवाक्कायनिमित्त आत्मप्रदेशपरिस्पन्दो योग । कषायस्तु क्रोधमानमायालोभादिका आत्मनो विभावपरिणति ।

ननु कर्मणामात्यंतिकक्षयः कथ सभवतीतिचेदित्थं—कर्मणां विपक्षस्य रत्नत्रयस्य परमप्रकर्षात् तेषामात्यतिकः क्षयः स्यादिति । यस्य हि तारतम्यप्रकर्षस्तस्य क्वचित् परमप्रकर्षः सिद्धयति, यथोष्णाभ्य । तारतम्यप्रकर्षश्च कर्मणां विपक्षस्य भवरनिर्जरालक्षणास्यासम्यग्दृष्टयादिगुणस्थानेषु प्रमाणतो निश्चीयते तस्मात् परमात्मनि तस्य परमः प्रकर्षः सिद्धयतीति ज्ञायते । दुःखादिप्रकर्षेण व्यभिचारः इति चेन्न, दुःखस्य सप्तमनरकभूमौ नारकाणां परमप्रकर्षसिद्धिः, सर्वार्थसिद्धौ देवानां सांसारिकसुखपरमप्रकर्षवत् । न

च क्रोधमानमायालोभानां तारतम्येन व्यभिचारसंभावना । तेषा-मसंयतेषु मिथ्यादृष्टिषु च परमप्रकर्षसिद्धेः । ज्ञानहानिप्रकर्षेणा-नैकान्त इति न वक्तव्यं । तस्यापि क्षायोपशमिकस्य हीयमानतया प्रकृष्यमाणस्य केवलिनि परमप्रकर्षसिद्धेः । क्षायिकस्य तु हानेरेवानु पलब्धेः कुतः परमप्रकर्षो येन व्यभिचारसंभावनाऽपि स्यात् ।

ननु किं स्वरूपाणि कर्माणि, येषां क्षयान्मोक्ष स्यादितिचेत्— जीवं परतन्त्रीकुर्वन्ति स परतन्त्रीक्रियते वा यैस्तानि कर्माणि, जीवेन वा मिथ्यादर्शनादिपरिणामैः क्रियन्त इति कर्माणि । तानि द्रव्यभा-वविकल्पेन द्वेधा । तत्र द्रव्यकर्माणि ज्ञानावरणादीन्यष्टौ मूलप्रकृ-तिभेदात् । उत्तरप्रकृतिभेदात्तु अष्टचत्वारिंशदुत्तरशतम् । ततोऽ-प्यधिकान्युत्तरोत्तरप्रकृतिभेदात् । एतानि च पुद्गलपरिणामात्मकानि जीवस्य पारतन्त्र्यनिमित्तत्वात् निगडादिवत् । न च क्रोधादिभि-र्व्यभिचारः तेषां जीवपरिणामानां पारतन्त्र्यस्वरूपत्वात् । पारतन्त्र्यं हि जीवस्य क्रोधादिपरिणामो न पुनः पारतन्त्र्यनिमित्तं । न च नामगोत्रसद्वेद्यायुषामात्मस्वरूपघातित्वाभावात् पारतन्त्र्यनिमित्तत्वा-सिद्धिरिति वाच्यं तेषामपि जीवस्वरूपसिद्धत्वप्रतिबंधित्वात् पार-तन्त्र्यनिमित्तत्वोपपत्तेः । तथा सति कथं तेषामघातिकर्मत्वमितिचेत् जीवन्मुक्तिलक्षणपरमार्हन्त्यलक्ष्मीघातित्वाभावादिति ।

भावकर्माणि पुनश्चैतन्यपरिणामात्मकानि । क्रोधादिभावकर्मणा-मौदयिकत्वेऽपि कथंचिदात्मनोऽभिन्नत्वात् चैतन्यरूपत्वाविरोधात् । ज्ञानरूपत्वं तु तेषां विप्रतिषिद्धं ज्ञानस्यौदयिकत्वाभावात् ।

कर्मणां सञ्चयस्तु जीवात् पृथग् भवनमेव, नतु तेषां विनाश मतो विनाशासभवात्। नैवाऽसतो जन्म सतो न नाशो दीपस्तमः पुद्गलभावतोऽस्तीत्यभिधानादिति।

नानाशास्त्राश्रय प्राप्य, सप्ततत्वविवेचनम्।
स्वात्मबोधप्रसिद्ध्यर्थं, सक्षेपात् कृतमत्र वै॥

॥ इति प्रथमोऽध्यायः॥

द्वितीयोऽध्यायः

आत्मनश्चरमपुरुषार्थसिद्धिर्हि जैनदर्शनस्य प्रयोजनमितिपूर्वमुक्तं। तत्सिद्धिश्चात्मेतरविवेकसाध्या। आत्मेतरविवेकस्तु तल्लक्षणप्रमाणनयनिक्षेपैर्विना न कदाचिदपि संभवति। अतः पदार्थावबोधहेतूनामेतेषां चतुर्णां विवेचनमावश्यकं। अतः सर्वतः प्रथममत्र लक्षणस्वरूपं प्रतिपाद्यते।

लक्षणस्वरूपम्

वस्तुव्यावृत्तिज्ञानहेतुर्लक्षणं तद्द्विविधमात्मभूतमनात्मभूतं च। यद् वस्तुस्वरूपात्मकं तदात्मभूतं, यथाऽग्नेरुष्णत्वं, आत्मनश्चेतनत्वं पुद्गलस्य रूपरसगन्धस्पर्शवत्त्वमित्यादि। उष्णत्वं हि अग्नेः स्वरूपं तदग्निं जलादिभ्यो व्यावर्तयति। तथैव चेतनत्वमात्मानमात्मेतरेभ्यः रूपादयश्च पुद्गलं पुद्गलेतरेभ्यः। यद् वस्तुस्वरूपात्मकत्वाभावेऽपीतरव्यावृत्तिज्ञानहेतुः तदनात्मभूतं यथा दण्डः पुरुषस्य। दण्डिनमानयेत्युक्ते हि दण्डः पुरुषात्मकत्वाभावेऽपि दण्डिनं दण्डीतरेभ्यो व्यावर्तयति। तथा चोक्तं *तथात्मभूतमग्नेरौष्ण्यमनात्मभूतं देवदत्तस्य* दण्ड इति।

यल्लक्षणं न भवति किन्तु लक्षणवदाभासते तल्लक्षणाभासं। तत् त्रिविधमव्याप्तमतिव्याप्तमसम्भवि चेति। ईषद्व्याप्तमव्याप्तं। अत्रेषदर्थस्यनञः प्रयोगात् यथानुदरा कन्या। अव्याप्तं हि लक्ष्यैक-

देशवृत्ति। निखिलेषु लक्ष्येषु तस्यवृत्तेरभावात्, यथा गोः शाबलेयत्वं। शाबलेयत्वं हि वर्णविशेषो न सर्वेषु गोषु वर्तते। लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वमतिव्याप्तं यथा गोः पशुत्वं। लक्ष्यमतिक्रम्य व्याप्तमित्यतिव्याप्तं, महिषादीनामपि पशुत्वात्। लक्ष्यवृत्तित्वाऽसम्भवित्वमसंभवि, यथा नरस्य विषाणित्वं। विषाणित्वं हि नैकस्मिन्नपि नरि वर्तते तस्मादसंभवित्वमस्य। इमे त्रयो लक्षणाभासभेदाः। अव्याप्त्यतिव्याप्त्यसंभवास्तु न लक्षणाभासभेदा अपितु लक्षणदोषाः, एतेषां भाववाचकत्वात् पूर्वेषां तु विशेषणत्वात्। अयञ्च केवल शब्दभेदोऽर्थस्तु न भिद्यते।

प्रमाणसामान्यस्वरूपम्

प्रमाणं सम्यग्ज्ञानं। तत्तु स्वापूर्वार्थव्यवसायात्मकं प्रमाणत्वात्। यज्ज्ञानं स्वमपूर्वमर्थञ्च निश्चयात्मकरूपेण विजानाति तद्धि प्रमाणं भवति। प्रमितिक्रियां प्रति तस्यैव करणत्वात्। प्रकर्षेण संशयादिव्यवच्छेदेन मीयते परिच्छिद्यते वस्तुतत्त्वं येनेति व्युत्पत्तेः। प्रमितिक्रिया हि अज्ञाननाशात्मिका। अज्ञानं तु ज्ञानमन्तरेण न विनाशयितुं शक्यते, ततस्तस्यैव तत्र करणत्वोचितत्वात्। यथान्धकारनाशने प्रदीपो हेतुस्तस्य तद्विरोधित्वात्, तथाऽज्ञाननिरासे ज्ञानं। तथाचाज्ञानरूपः सन्निकर्ष, अज्ञानीन्द्रियाणि, अन्ये च प्रमितेः परम्पराहेतवो न प्रमाणानि, तेषां तत्साक्षाद्धेतुत्वाभावात्। साधकविशेषस्य अतिशयवतः करणत्वात्। साधकतमं करणमिति जैनेन्द्रव्याकरणे प्रोक्तत्वात्।

ननु चक्षुषा प्रमिणोमि, धूमेनानुमिनोमि, शब्देन विजानामि,

गवोपमिनोमीत्यादौ ज्ञानातिरिक्तानामपि प्रमितिकरणत्व। दृश्यते तथा च तेषामपि प्रमाणत्वाभ्युपगमे कोदोषः इति चेन्न, तेषां प्रमितौ ज्ञानेन व्यवहितत्वात्। औपचारिका ह्येमे प्रयोगाः अन्नं वै प्राणाः धनं वै प्राणा, आयुर्वैघृतमित्यादिवत्। चक्षुरादयोहि तत्र सहकारिणः न तु प्रमाणानि, ततः प्रमितिक्रियां प्रति तेषां साधकतमत्वाभावान्न प्रमाणत्वं। तदुक्तं प्रमाणनिर्णये इदमेव हि प्रमाणस्य प्रमाणत्वं यत् प्रमितिक्रियां प्रति साधकतमत्वेन करणत्वमिति।

चक्षुरादयो ह्यचेतना न ते स्वावभासनसमर्थाः। ततः कथं तेषां परावभासकत्वं स्यात्। ततोऽस्वसंविदितानां स्वावासनेऽशक्तानां तेषां परावभासकत्वायोगः। ज्ञानं तु स्वपरावभासकं स्वानुभवसिद्ध। तथा च स्वपरावभासनसमर्थं सविकल्पकमगृहीतग्राहकं सम्यग्ज्ञानमेवाज्ञानमर्थं निवर्तयत् प्रमाणमिति। यत्तु स्वासंवेदकं निर्विकल्पकं गृहीतग्राहकमज्ञानरूपञ्च न तत् कथञ्चदपि प्रमाणं, तथा चोक्तं न्यायसूत्रकारेण माणिक्यनन्दिना—अस्वसंविदित-गृहीतार्थ-दर्शन संशयादयः प्रमाणाभासा। अत्रादिपदेन विपर्ययानध्यवसाययोरपि ग्रहणम्।

संशयो हि प्रमाणासिद्धानेककोटिस्पर्शात्मकः प्रत्ययः, यथा स्थाणुर्वा पुरुषो वेति। अस्ति च नास्ति च घटः नित्यश्चानित्यश्चात्मेत्य त्रौ अनेककोटिस्पर्शात्मकप्रत्ययत्वे सत्यपि प्रमाणसिद्धत्वान्न संशयः। तद्भिन्ने वस्तुनि तत्प्रत्ययो विपर्ययः, यथा शुक्तिकायां रजतमितिज्ञानं। अनात्मन्यात्मेतिज्ञानं। वस्त्वनुल्लेखी किमित्यालोचनमात्रप्रत्ययोऽनध्यवसायः यथा पथि गच्छतस्तृणस्पर्शादिज्ञानम्।

स्वतस्त्वपरतस्त्ववादः

अथैतल्लक्षणप्रमाणस्य यत् प्रामाण्यं तस्य कथमुत्पत्तिः स्वतः परतो वा ? प्रामाण्योत्पत्तिः परत एव विशिष्टकार्यस्य विशिष्टकारणप्रभवत्वात् । ज्ञानं हि सामान्यं सम्यङ्मिथ्याज्ञानयोरुभयोरपि ज्ञानत्वात् । सम्यग्ज्ञानं मिथ्याज्ञानं तु तस्य विशेषः । अतः ज्ञानसामान्यस्य यान्युत्पत्तिकारणानि न तानि तद्विशेषस्य । प्रमाणाप्रमाणरूपयोः सम्यङ्मिथ्याज्ञानयोः भिन्नकारणप्रभवत्वात् । ज्ञानसामान्यस्य कारणानि–प्रत्यक्षस्येन्द्रियादीनि, अनुमानस्य लिङ्गादि, शाब्दस्य शब्दादि । प्रमाणात्मकप्रत्यक्षस्य तु न केवलमिन्द्रियाणि किंतु तत्स्थाः नैर्मल्यादयो गुणाः । तथैव प्रमाणभूतस्यानुमानस्य न परं लिङ्गं, किंतु लिङ्गस्याविनाभावः । एवं प्रमाणात्मकशाब्दज्ञानस्य शब्द एव केवलो न कारणमपि तु आप्तोक्तत्वरूपोगुणः । तथैव मिथ्याज्ञानरूपस्याप्रामाण्यस्य हेतवो दोषाः । तथा च यथाऽप्रामाण्यं परतः उत्पद्यते तथा प्रामाण्यमपि । न खलु पटसामान्यसामग्री रक्तपटे हेतुस्तथा न ज्ञानसामान्यसामग्री प्रमाणज्ञाने हेतुः । तथा च प्रामाण्यं विज्ञानकारणातिरिक्तकारणजन्यं तद्भिन्नकार्यत्वात् अप्रामाण्यवत् । अथवा ज्ञानप्रामाण्ये भिन्नकारणजन्ये भिन्नकार्यत्वात् घटपटवत । तत. स्थित प्रामाण्यं परापेक्षमेवोत्पत्तौ ।

कथं तस्य ज्ञप्तिरितिचेत् अभ्यस्तविषये स्वतोऽनभ्यस्ते तु परतः । परिचितस्वग्रामतटाकजलादिरभ्यस्तः । तदितरोऽनभ्यस्तः । अभ्यस्तविषये प्रामाण्यनिश्चयो न परापेक्षः, न हि तत्र प्रेक्षावतां निर्णयाकाङ्क्षा । तत्र हि जलज्ञानानन्तरं स्वत एव प्रवृत्तिप्राप्ति–

प्रतीतेः ।

अनभ्यस्तविषये तु प्रामाण्यनिश्चयः परापेक्षएव । तस्य हि तदेकविषयात् संवादकात् ज्ञानान्तराद्वा, अर्थक्रियानिर्भासाद्वा, अविनाभूतार्थदर्शनाद्वा प्रामाण्य निश्चीयते । तेषां च स्वतः प्रामाण्य-निश्चयान्नानवस्थावकाशः । एतच्चसर्वं प्रत्यक्षविषये । अनुमाने तु सर्वस्मिन्नपि स्वत एव प्रामाण्यमव्यभिचारिलिङ्गसमुत्थत्वात् । शाब्दे तु प्रमाणे दृष्टार्थेऽर्थाव्यभिचारस्य दर्शनात संवादाद्यधीनः परतः प्रामाण्यनिश्चयः । अदृष्टार्थे तु सवादमन्तरेणापि आप्तोक्तत्वादेव प्रामाण्यविनिश्चयः इति । ततः प्रामाण्यस्य ज्ञप्तिः कथं चित स्वत. कथंचित् परत इति श्रद्धानव्यमिति ।

प्रमाणविशेषप्रत्यक्षस्वरूपम्

प्रमाणसामान्यस्वरूपमभिधाय तद्विशेषस्वरूपविवेचनमधुना प्रारभ्यते । तत् प्रमाणं द्विविध, प्रत्यक्षं परोक्षं च । तत्र विशदज्ञानात्मकं प्रत्यक्षं । अग्निरस्तीति आप्तवचनात् धूमादिलिङ्गाच्चोत्पन्नाज् ज्ञानादयमग्निरिति प्रत्यक्षस्य नैर्मल्यं स्वानुभवसिद्धम् । यस्मिन् ज्ञाने ज्ञानान्तरस्य व्यवधानं न भवति, विशेषवत्तया प्रतिभासनं च भवति तत प्रत्यक्षमित्यर्थः । तद् द्विविधं सांव्यवहारिकं पारमार्थिकं च । यज्ज्ञानं देशतोविशदमीषन्निर्मलं तत् सांव्यवहारिक प्रत्यक्षम् । समीचीनो व्यवहारः संव्यवहारः, स प्रयोजनमस्य तत् सांव्यवहारिकमनिन्द्रियकप्रत्यक्षमित्यर्थः । तच्चावग्रहेहाऽवायधारणा, इति चतुर्भेदम् । तत्र विषयविषयिसन्निपातसमनन्तरमाद्यग्रहणमवग्रहः, यथा चक्षुषा

शुक्लं रूपमिति ग्रहणम् । अवग्रहगृहीतेऽर्थे तद्विशेषाकांक्षणमीहा यथा शुक्लं रूपंबलाका भवेत् । विशेषनिर्दर्शनाद् याथात्म्यावगमनमवायः, यथा–उत्पतननिपतनपक्षविक्षेपादिभिर्बलाकैवेयं न पताकेति । अवेतस्य कालांतरेऽविस्मरणाकारणं धारणा, यथा सैवेयं बलाका पूर्वाह्णे यामहमद्राक्षमिति ।

एतदवग्रहादिज्ञानचतुष्टयस्य निदर्शनान्तरमपीदं स्पष्टप्रतिपत्त्यर्थं ज्ञातव्यम्–यथाय पुरुष इति अवग्रहः, ततः पुरुष इत निश्चितेऽर्थे किमय दाक्षिणात्य उतौदीच्य इति संशये सति दाक्षिणात्येन भवितव्यमिति तन्निरासायेहाख्य ज्ञानं जायते । पुनः भाषादिविशेषनिर्ज्ञानाद् दाक्षिणात्य एवाऽयमिति अवायः एतदेव स्मृतिजननसमर्थं ज्ञान धारणा प्रोच्यते यद्वशात् स दाक्षिणात्य इत्येव स्मरणं जायते ।

ननु पूर्वपूर्वज्ञानगृहीतविषयग्राहकत्वादेतेषां धारावाहिकवद्प्रामाण्यप्रसंगः इति चेन्न विषयभेदेनागृहीतग्राहकत्वात् । एतदवग्रहादिचतुष्टयं यदेन्द्रियेण जन्यते तदेन्द्रियप्रत्यक्षमित्युच्यते । यदा पुनरनिन्द्रियेण (मनसा) तदाऽनिन्द्रियप्रत्यक्षमभिधीयते ।

इन्द्रियाणि स्पर्शनरसनघ्राणचक्षुःश्रोत्राणि अतीन्द्रियं तु मनः तदुभयहेतुकमिदं लोकसंव्यवहारे प्रत्यक्षमिति प्रसिद्धत्वात् सांव्यवहारिकप्रत्यक्षमित्युच्यते । तदुक्तं "इन्द्रियानिन्द्रियनिमित्तं देशतः सांव्यवहारिकं" । इदं चामुख्यप्रत्यक्षमुपचारसिद्धत्वात् वस्तुतस्तु परोक्षमेव, इंद्रियजन्यत्वेन मतिज्ञानत्वात् ।

ननु प्रत्यक्षस्य द्वयानिन्द्रियनिमित्तत्वमेव कथं, अर्थालोकयोरपि तस्य कारणत्वादिति चेन्न अर्थालोकयोर्ज्ञानकारणत्वानुपपत्तेः। अर्थाभावेऽपि केशमशकादिज्ञानोत्पत्तेः। आलोकस्यापि न ज्ञानकारणत्वं, तदन्वयव्यतिरेकाभावात्। आलोकसत्त्वेऽपि घूकादीनां ज्ञानोत्पत्त्यभावात्। तदभावेऽपि च रात्रौ नक्तंचरादीनां ज्ञानोत्पत्तेः।

सर्वथा विशदं पारमार्थिकं प्रत्यक्षं। यज्ज्ञाने साकल्येन स्पष्टं तत्पारमार्थिकं प्रत्यक्षं तदेव मुख्यप्रत्यक्षमिति निगद्यते। तद् द्विविधं सकलं विकलं च। तत्र पुद्गलद्रव्यपर्यायविषयं विकलं। तदपि द्विविधमवधिज्ञानं मनःपर्ययज्ञानं च। यद् द्रव्यक्षेत्रकालभावमर्यादया पुद्गल (रूपि) द्रव्यस्य कांश्चित् पर्यायान् विजानाति तदवधिज्ञानं मर्यादारूपत्वात्। यत् पुनः परमनोगतपुद्गलद्रव्यविषयं तन्मनःपर्ययज्ञानं। एतच्च ज्ञानद्वयं स्वस्वावरणवीर्यान्तरायकर्मक्षयोपशमाद् समुत्पद्यते। पूर्वोक्तं सांव्यावहारिकप्रत्यक्षमपि स्वावरणक्षयोपशमात् संजायते सर्वद्रव्यपर्यायविषयं सकलं। तच्च ज्ञानावरणादिघातिकर्मचतुष्टयनिरवशेषक्षयादाविर्भूतं केवलज्ञानमेव लोकालोकप्रकाशकं, "सर्वद्रव्यपर्यायेषु केवलस्य" इति तत्त्वार्थसूत्रप्ररूपणात्। तदेवमवधिमनःपर्ययकेवलज्ञानत्रयं सर्वतो वैशद्यमात्ममात्रसापेक्षत्वात्।

ननु अक्षं नाम चक्षुरादिकमिन्द्रियं तत्प्रतीत्य यदुत्पद्यते तस्यैव प्रत्यक्षत्वमुचितं नान्यस्य इति, तदसत्, आत्ममात्रसापेक्षाणामिन्द्रियनिरपेक्षाणामवधिमनःपर्ययकेवलानां प्रत्यक्षत्वाविरोधात्। इन्द्रियजन्यत्वाभावेऽपि तेषां विशदप्रतिभासात्मकत्वात् प्रत्यक्षत्वं।

न खलु इन्द्रियजन्यत्वं प्रत्यक्षत्वप्रयोजकमपि तु विशदप्रतिभासात्मकत्वं।

कथं पुनरेतेषां प्रत्यक्षशब्दवाच्यत्वमिति चेत् रूढित इति। अथवा अश्नुते व्याप्नोति वा व्याप्नोति सकलद्रव्यपर्यायानिति अक्ष आत्मा तन्मात्रापेक्षोत्पत्तिकं प्रत्यक्षमिति। तर्हि इन्द्रियजन्यस्याप्रत्यक्षत्वं स्यात् इति चेन्न, इन्द्रियजन्यज्ञानस्य वस्तुतोऽप्रत्यक्षत्वात्, उपचारत एव तस्य प्रत्यक्षत्वस्वीकारादित्युक्तमेव। उपचारमूलं तु तस्य देशतो विशदत्वमिति। एतेनाक्षेभ्यः इन्द्रियेभ्यः परावृत्तं परोक्षमित्यपि निरस्तं। अविशदस्यैव परोक्षलक्षणत्वात्। नन्वतीन्द्रियप्रत्यक्षकल्पनाऽसम्भवेति चेन्न, अर्हतोऽतीन्द्रियप्रत्यक्षस्य संभवात्। तस्य सर्वज्ञत्वात्। नन्वियमपि तादृश्येव कल्पना सर्वज्ञत्वासंभवादिति न वाच्यं, अनुमानात् सर्वज्ञत्वसिद्धेः। तथाहि कश्चित् पुरुषः सकलपदार्थसाक्षातकारी, तद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबंधप्रत्ययत्वात्। यो यद्ग्रहणस्वभावत्वे सति प्रक्षीणप्रतिबंधप्रत्ययः स तत्साक्षात्कारि यथाऽपगततिमिरं लोचनं रूपसाक्षात्कारीत्यनुमानेन सर्वज्ञत्वसिद्धेः। सर्वज्ञसामान्यसाधनानन्तरं–अर्हन् सर्वज्ञो निर्दोषत्वात्, यस्तु न सर्वज्ञो नासौ निर्दोषो यथा रथ्यापुरुष इति केवलव्यतिरेकिणानुमानेनार्हतः सर्वज्ञत्वं साध्यते। कथं तस्य निर्दोषत्वमिति चेत् युक्तिशास्त्राविरोधिवाक्त्वादिति। तदपि तदभिमतस्य मुक्तिसंसारकारणस्याऽनेकान्तात्मकतत्त्वस्य च प्रमाणाबाधितत्वात् सुव्यवस्थितमेव।

प्रमाणविशेषपरोक्षस्वरूपम्

अविशदप्रतिभासं परोक्षं। तत् पञ्चविधं, स्मृतिः, प्रत्यभिज्ञानं,

तर्कोऽनुमानमागमश्चेति । पंचविधमप्येतत् ज्ञानान्तरसापेक्षत्वेनैवो-त्पद्यते । स्मृतेः पूर्वानुभवापेक्षा, प्रत्यभिज्ञानस्य स्मृत्यनुभवापेक्षा, तर्कस्यैतत्त्रयापेक्षा । अनुमानस्य लिंगग्रहणाद्यपेक्षा । आगमस्य च शब्दश्रवणाद्यपेक्षेति पंचस्वपि परोक्षप्रमाणेषु ज्ञानान्तरापेक्षा । प्रत्यक्षे तु न तथा, स्वातंत्र्येणैवतस्योत्पत्तेः ।

स्मृतिप्रत्यभिज्ञानतर्काणां पृथक्प्रामाण्यसमर्थनम्

स्मृतिप्रमाण्यसमर्थनं—तदित्याकारा प्रागनुभूतवस्तुविषया स्मृतिः यथा स देवदत्तः । केचित् स्मृतेः प्रामाण्यं न स्वीकुर्वन्ति तन्न समीचीनं । स्मृतेरनुभूतार्थविषयत्वेन गृहीतग्राहित्वादप्रामाण्यमिति न वक्तव्य, परिच्छित्तिविशेषसद्भावात् न खलु यथा प्रत्यक्षे विशदाकार-तया प्रतिभासस्तथैव स्मृतौ तत्र तस्या वैशद्याऽप्रतीतेः । न च तस्या विसम्वादादप्रामाण्य, दत्तग्रहादिविलोपापत्तेः । तद्गृहीतेऽर्थे स्वयं स्थापितनिक्षेपादौ प्राप्तिप्रमाणांतरप्रवृत्तिलक्षणाविसम्वादप्रतीतेः । यत्र तु विसम्वादस्तत्र स्मृतेराभासत्वं प्रत्यक्षाभासवत् । यदि स्मृतेः प्रामाण्यं न स्वीक्रियेत तर्हि तदधीनः निखिलोऽपि लोकव्यव-हारोऽविश्वसनीयः स्यात् । स्मृतेरप्रामाण्ये तु अनुमानवार्ताऽपि दुर्लभा । तयाऽव्याप्तेर्विषयीकरणे तदुत्थानायोगात् । ततोनुमान-स्य प्रामाण्यं स्वीकुर्वद्भिः स्मृतेरवश्यमेव प्रामाण्यमङ्गीकर्तव्यमिति ।

प्रत्यभिज्ञानप्रमाणसमर्थनं—दर्शनस्मरणकारणकं सकलनं प्रत्य-भिज्ञान । तदनेकविध - एकत्वसादृश्यवैसादृश्यप्रतियोग्यादिभेदात् । तदेवेदमितिएकत्वप्रत्यभिज्ञानं, यथा स एवाय देवदत्तः । तत्सदृश-मिति सादृश्यप्रत्यभिज्ञानं, यथा गोसदृशोगवयः । तद्विलक्षणमिति

वैसादृश्यप्रत्यभिज्ञानं, यथा गोविलक्षणो महिषः। तत्प्रतियोगीति तुलनाप्रत्यभिज्ञानं, यथा इदमस्माद् दूरमिति।

ननु प्रत्यभिज्ञायाः प्रत्यक्षप्रमाणरूपत्वात् परोक्षरूपतयाऽत्राभिधानमयुक्त, तथा हि प्रत्यक्षं प्रत्यभिज्ञा इन्द्रियान्वयव्यतिरेकानुविधानात् तदन्यप्रत्यक्षवत्, तन्न समीचीनं, प्रत्यभिज्ञायामिन्द्रियान्वयव्यतिरेकानुविधानस्यासिद्धेः। अन्यथा प्रथमव्यक्तिदर्शनकालेऽपि अस्योत्पत्तिः स्यात्। न च स्मृतिसहायमिन्द्रियं प्रत्यभिज्ञान जनयतीति वाच्यं, प्रत्यक्षस्य स्मृतिनिरपेक्षत्वात्। तत्सापेक्षत्वेऽपूर्वार्थसाक्षात्कारित्वाभावः स्यात्। प्रत्यक्ष हीन्द्रियसम्बद्धमेवार्थं प्रकाशयति, प्रत्यभिज्ञानं तु पूर्वोत्तरविवर्तवर्त्येकत्वविषयम्।

ननु स एवायमित्यादि प्रत्यभिज्ञान नैकं ज्ञानं स इत्युल्लेखस्य स्मृतिरूपत्वात् अयमित्युल्लेखस्य च प्रत्यक्षत्वात्। नचाभ्यां व्यतिरिक्त ज्ञानमस्ति यत् प्रत्यभिज्ञानशब्दवाच्य भवेत्। नाप्यनयोरेकत्व प्रत्यक्षानुमानयोरपि तत्प्रसङ्गात्। विशदेतररूपतया तयोर्भेदे स्मृतिप्रत्यक्षयोरपि भेदः स्यात्, इत्येतत् सर्वं न युक्तिसंगतम्। स्मृति प्रत्यक्षोत्पन्नस्य पूर्वोत्तरविवर्तवर्त्येकद्रव्यविषयस्य सङ्कलनात्मकज्ञानस्यैकस्य प्रत्यभिज्ञानत्वेनानुभवसिद्धत्वात्। न खलु केवला स्मृतिरेव भूतवर्तमानपर्यायवर्तिद्रव्यं सङ्कलयितु समर्था, तस्या अतीतपर्यायमात्रविषयत्वात्। नापिप्रत्यक्षं तस्य वर्तमानपर्यायमात्रगोचरत्वात्।

कथं च प्रत्यभिज्ञानास्वीकारेऽनुमानप्रवृत्ति। पूर्वधूमसदृशधूमदर्शनाद्वग्नेरनुमानं भवति। न च प्रत्यभिज्ञान विना तेन सदृशोऽयं धूम इति प्रतिपत्तिरस्ति।

नन्वेकत्वमेव प्रत्यभिज्ञा सादृश्यज्ञानं तूपमानमिति चेन्न । तथा सति वैलक्षण्यज्ञानं किन्नाम प्रमाणं स्यात् । यथैव गोदर्शनाहितसंस्कारस्य गवयदर्शिनोऽनेन समान स इति प्रतिपत्तिः तथा महिष्यादिदर्शिनोऽनेन विलक्षणः स इति वैलक्षण्यप्रतीतिरप्यस्ति । तथा च प्रत्यभिज्ञानलक्षणाक्रान्तत्वेन पूर्वोक्तानां सर्वेषां प्रत्यभिज्ञानत्वमेव ।

तर्कस्य पृथक् प्रामाण्यसमर्थनम्—व्याप्तिज्ञानं तर्कः । साध्यसाधनयोर्गम्यगमकभावप्रयोजको व्यभिचारगन्धासहिष्णु सम्बन्धविशेषो व्याप्तिः । स एवाविनाभाव इत्यपि कथ्यते । अविनाभावापरनाम्न्याः एतस्याः व्याप्तेः प्रमितौ यत् साधकतमं तदिदं तर्काख्यं प्रमाणं पृथगेव । अनेन हि साध्यसाधनसम्बन्धाज्ञाननिवृत्तिः क्रियते । अस्योदाहरणं तु यथा यत्र यत्र धूमस्तत्र तत्राऽग्निरिति । तर्को हीमां व्याप्तिं सर्वदेशकालोपसंहारेण विषयीकरोति । यस्मिन् कस्मिंश्चिद् देशे, यस्मिन् कस्मिंश्चित् काले, यावान् कश्चिद् धूमः सोऽग्निजन्मा भवति अनग्निजन्मा वा न भवतीत्येवंरूपः सर्वोपसंहारः । प्रत्यक्षस्य तु सन्निहितवर्तमानविषयत्वान्न व्याप्तिप्रकाशकत्वम् । ननु यद्यपि प्रत्यक्षमात्रं व्याप्तिविषयीकरणे समर्थं न भवति तथापि स्मरणप्रत्यभिज्ञानसहकृतं प्रत्यक्षमेव व्याप्तिं विषयीकर्तुं शक्नुयादिति किं तर्कनाम्ना पृथक्प्रमाणेनेति चेन्न । सहकारिशतसमवधानेऽपि प्रत्यक्षस्य विषयान्तरप्रवृत्त्ययोगात् । वस्तुतस्तु स्मरणं, प्रत्यभिज्ञानं, भूयोदर्शनरूपं प्रत्यक्षं च मिलित्वा एतादृशमेकं ज्ञानं समुत्पादयन्ति यद्व्याप्तिग्रहणसमर्थं, तर्कोऽपि स एव ।

ननु अनुमानेन व्याप्तिं गृह्णीयादिति चेन्न, प्रकृतानुमानेनानुमानान्तरेण वा व्याप्तिग्रहणेऽन्योन्याश्रयाऽनवस्थाऽवतारात्। प्रत्यक्षानुमानाभ्यां विकल्पो व्याप्तिं गृह्णातीति वचोऽपि तद्विकल्पस्याप्रामाण्ये कथं तद्गृहीतव्याप्तौ समाश्वासः, प्रमाणत्वे तु प्रत्यक्षानुमानातिरिक्तः तर्क एवेति सिद्धं तर्काख्यं पृथक्प्रमाणमिति।

ननु व्याप्यारोपेण व्यापकारोपरूपस्तर्को मिथ्याज्ञानमेवेति चेन्न, तस्य मिथ्याज्ञानत्वेऽनुमानस्य न कदाचिदपि प्रामाण्यं स्यादिति तर्कस्य प्रामाण्यमवश्यमेव स्वीकर्तव्यम्।

अनुमानप्रमाणस्य निरूपणम्—साधनात् साध्यविज्ञानमनुमानं। यथा पर्वतो वह्निमान् धूमादिति। साधनञ्चान्यथानुपपत्त्येकलक्षणं, साध्याविनाभावित्वेन निश्चितो हेतुरिति प्रोक्तत्वात्। साध्यं तु इष्टमबाधितमसिद्धं। तथा चाविनाभावैकलक्षणात्साधनज्ञानाद् यत् साध्यज्ञानं भवति तदनुमानं। तस्य द्वौ भेदौ, स्वार्थानुमानपरार्थानुमानविकल्पात्। स्वप्रतिपत्तिहेतुः स्वार्थानुमानं, परप्रतिपत्तिहेतुश्च परार्थानुमानं। स्वयमेव निश्चिताद् धूमादयं पर्वतो वह्निमानिति ज्ञानं यदा भवति तदा तत् स्वार्थानुमानं प्रोच्यते। अस्य स्वार्थानुमानस्य त्रीणि अङ्गानि धर्मी, साध्यं, साधनञ्च। तत्र साधनं गमकत्वेनाङ्गं, साध्यं गम्यत्वेन, धर्मी तु साध्यधर्माधारत्वेन। पक्षो हेतुरित्यङ्गद्वयमपि स्वार्थानुमानस्य। एतत्तु विवक्षाया वैचित्र्यात्, साध्यधर्मविशिष्टस्य धर्मिण एव पक्षत्वात्।

परोपदेशमपेक्ष्य साधनाद् यत् साध्यविज्ञानं भवति तत्परार्थानुमानं। प्रतिज्ञाहेतुरूपपरोपदेशात् श्रोतुरुत्पन्नं साधनज्ञानहेतुकं

साध्यपरिज्ञानं परार्थानुमानमित्यर्थः। पर्वतोऽयं वह्निमान् धूमवत्त्वान्यथानुपपत्तेः, तथैव धूमवत्त्वोपपत्तेर्वेति वाक्यमाकर्ण्य तद्वाक्यार्थं विचारयतः स्मृतव्याप्तिकस्य श्रोतुरनुमानमुपजायते। एतस्य परार्थानुमानप्रयोजकवाक्यस्य स्वार्थानुमानवत् द्वौ अवयवौ, प्रतिज्ञा हेतुश्चेति। तत्र पक्षवचनं प्रतिज्ञा, यथा धूमवत्त्वान्यथानुपपत्तेरिति तथैवधूमवत्त्वोपपत्तेरिति वा। अनयोर्हेतुप्रयोगयोरुक्तिवैचित्र्यमात्रं, प्रथमे निषेधमुखेन कथनं द्वितीये तु विधिमुखेनेति द्वयोरेकमेव प्रयोक्तव्यं धूमादित्यपि प्रयोक्तुं शक्यते वेति।

नैयायिकास्तु परार्थानुमानस्य पंचावयवान् स्वीकुर्वन्ति, प्रतिज्ञाहेतूदाहरणोपनयनिगमनाख्यान्। तत्तु नावश्यकं पूर्वोक्ताभ्यां द्वाभ्यामेवावयवाभ्यां प्रतिज्ञाहेतुरूपाभ्यां पर्याप्तत्वात्। वीतरागकथायां तु शिष्याभिप्रायानुरोधेन यद्यपि अवयवाधिक्यमपि स्यात् किन्तु विजिगीषुकथायां प्रतिज्ञाहेतुरूपावयवद्वयेनैव पर्याप्तेः अन्यैरवयवैः न किमपि प्रयोजनम्। विजिगीषुकथा हि वादिप्रतिवादिनोः स्वमतस्थापनार्थं प्रवर्तमानो वाग्व्यापारः। गुरुशिष्ययोर्वा जिज्ञासूनां वा रागद्वेषरहितानां तत्त्वनिर्णयपर्यन्तं प्रवर्तमानो वचनव्यवहारो वीतरागकथा। वादस्तु विजिगीषुकथारूपः, तस्मिन् न पूर्वोक्तावयवाधिक्यस्य प्रयोजनं। वीतरागकथायां तु शिष्यानुरोधेन द्वौ वा त्रयो वा चत्वारो वा पञ्च वा अवयवा भवन्ति। "प्रयोगपरिपाटी तु प्रतिपाद्यानुरोधतः" इत्युक्तत्वात्। के ते पञ्चावयवा इति चेत्, पर्वतो वह्निमानितिप्रतिज्ञा, धूमवत्त्वादितिहेतुः यत्र यत्र धूमस्तत्र तत्र वह्निर्यथा महानसः यत्र वह्निर्नास्ति तत्र धूमोऽपि नास्ति यथा महाह्रदः

इति उदाहरणं, धूमवांश्चायमित्युपनयः, तस्माद् वह्निमानिति-निगमनम्।

ननु भवद्भिरुक्तमन्यथानुपपत्त्येकलक्षणं साधनं तत् त्रिरूपं पंचरूपं वा। पक्षधर्मसपक्षसत्त्वविपक्षव्यावृत्तयो हि हेतोः त्रीणि रूपाणि। पञ्चरूपाणि तु एतत्त्रयविशिष्टाबाधितविषयत्वासत्प्रतिपक्षत्वे। यदि हेतोः त्रैरूप्यं पांचरूप्यं वा लक्षणं स्यात् का हानिरिति चेन्न, त्रैरूप्ये पांचरूप्ये वा हेतोर्लक्षणेऽव्याप्त्यतिव्याप्तिदोषापत्तेः। उदेष्यति शकटं कृत्तिकोदयादित्यादिसद्धेतौ त्रैरूप्यपांचरूप्याभावेऽपिगमकत्वदर्शनादव्याप्तिः। गर्भस्थो मैत्रतनयः श्यामो मैत्रतनयत्वादित्यादि असद्धेतौ त्रैरूप्यपांचरूप्यसंभवेऽपि गमकत्वादर्शनादतिव्याप्तिः। अन्यथानुपपन्नत्व हेतोर्लक्षणं तु न कुत्रापि अतिव्याप्नोति। न च तस्य कुत्रचिदव्याप्तिः, अत एतदेव हेतोः समीचीनं लक्षणं। यत्रान्यथानुपपत्तिस्तत्र न त्रैरूप्यस्य पांचरूप्यस्य वाऽऽवश्यकता। यत्र चैषा नास्ति तत्र निरर्थकमेतद्द्वय। तथा चोक्तम्—

> अन्यथानुपपन्नत्वं यत्र तत्रत्रयेण किम्।
> नान्यथानुपपन्नत्वं यत्र तत्र त्रयेण किम्।

इदं बौद्धानुद्दिश्य। नैयायिकान् प्रतितु—

> अन्यथानुपपन्नत्वं यत्र किं तत्र पञ्चभिः।
> नान्यथानुपपन्नत्वं यत्र किं तत्र पञ्चभिः।

एष हेतुः संक्षेपतो द्विविधः। विधिरूपः प्रतिषेधरूपश्चेति। विधिरूपोऽपि द्विविधो, विधिसाधकः प्रतिषेधसाधकश्चेति। तत्र प्रथमोऽनेकविधः – कश्चित्कार्यरूपः यथापर्वतो वह्निमान् धूमवत्वादिति। कश्चित

कारणरूपो यथा वृष्टिर्भविष्यति विशिष्टमेघान्यथानुपपत्तेरिति। कश्चिद्विशेषरूपो यथा वृक्षोऽयं निम्बत्वात्। कश्चित्पूर्वचरो यथा उदेष्यति शकटं कृत्तिकोदयात्। कश्चिदुत्तरचरो यथा उदगाद् भरणिः प्राक् कृत्तिकोदयात्। कश्चित्सहचरो यथा आम्रं रूपवत् रसवत्त्वात्। एते हि हेतवो भावरूपा भावरूपमेवान्यार्थान् साधयन्तीति विधिसाधकविधिरूपाः प्रोच्यन्ते। एत एवाविरुद्धोपलब्धय इत्यप्युच्यन्ते।

द्वितीयस्तु निषेधसाधकः विरुद्धोपलब्धिरिति यावत्, यथा नास्य मिथ्यात्वं आस्तिक्यान्यथानुपपत्तेः। यथा वा नास्ति वस्तुनि सर्वथैकान्तः अनेकान्तात्मकत्वान्यथानुपपत्तेः।

प्रतिषेधरूपोऽपि हेतुर्द्विविधो विधिसाधकः, प्रतिषेधसाधकश्चेति। आद्यो यथा अस्त्यत्र प्राणिनि सम्यक्त्व विपरीताभिनिवेशाभावात्। द्वितीयो यथा नास्त्यत्र धूमो वह्न्यनुपलब्धेः। अनयोः प्रथमो विरुद्धानुपलब्धि द्वितीयस्तु अविरुद्धानुपलब्धिरित्यपि निगद्यते। पूर्वोक्तहेतुलक्षणरहिता ये हेतवस्ते हेत्वाभासा एव। हेतुलक्षणरहितत्वेऽपि हेतुवदवभासमानत्वात्। ते च चत्वारोऽसिद्धविरुद्धानैकान्तिकाकिञ्चित्करभेदात्। तत्र असत्सत्तानिश्चयोऽसिद्धः, तस्य द्वौ भेदौ, प्रथमः स्वरूपासिद्धो यथा शब्दः परिणामी चाक्षुषत्वात्। शब्दस्य श्रावणत्वाच्चाक्षुषत्वाभावो निश्चितः इति स्वरूपासिद्धत्वमस्य। द्वितीयः सन्दिग्धासिद्धो यथा कश्चिन्मुग्धबुद्धिः प्रयुङ्क्ते—अग्निरत्र धूमात् तस्य वाष्पादिभावेन भूतसंघाते संदेहात्।

साध्यविरुद्धव्याप्तो विरुद्धः यथा, अपरिणामी शब्दः कृतकत्वात्। कृतकत्वं हि अपरिणामविरोधिना परिणामेन व्याप्तमिति।

विपक्षेऽप्यविरुद्धवृत्तिरनैकान्तिकः। स द्विविधः, निश्चितवृत्तिः शङ्कितवृत्तिश्च। तत्र प्रथमः अनित्यः शब्दः प्रमेयत्वाद् घटवत्। आकाशे नित्येऽप्यस्य निश्चयात्तस्य निश्चितवृत्त्यनैकान्तिकत्वं। द्वितीयस्तु नास्ति सर्वज्ञो वक्तृत्वात् सर्वज्ञत्वेन वक्तृत्वाविरोधात्तस्य शङ्कितवृत्त्यनैकान्तिकत्वं। सामीप्येऽपि वचनादानप्रवृत्त्यादिदर्शनात्।

सिद्धे प्रत्यक्षादिबाधिते च साध्ये हेतुरकिञ्चित्करः। सिद्धः श्रावणः शब्दः शब्दत्वात्। किञ्चिदकरणादस्याकिंचित्करत्वं। यथाऽनुष्णोऽग्निर्द्रव्यत्वादित्यादौ किञ्चित्कर्तुमशक्यत्वादकिंचित्करत्वमस्ति।

आगमप्रमाणस्वरूप— आप्तवाक्यादिनिबन्धनमर्थज्ञानमागमः। आप्तस्तु यथार्थवक्ता। यो यत्राऽवञ्चकः स तत्राऽऽप्तः। इदं च व्यवहारापेक्षयाऽऽप्तलक्षणं, आगमभाषया तु आप्त प्रत्यक्षप्रमितसकलार्थत्वे सति परमहितोपदेशकोऽभिधीयते। परमहितं तु निःश्रेयसं तदुपदेश एव अर्हतः प्राधान्येन प्रवृत्तेः। तस्यैव केवलज्ञानप्रमितसकलार्थत्वे सति परमहितोपदेशकत्वादाप्तत्वं। यद्यपि सिद्धपरमेष्ठी अपि सकलपदार्थप्रत्यक्षद्रष्टा तथापि न स आप्तस्तस्य परमहितोपदेशकत्वाभावात्, तदभावश्चशरीराद्यभावात्।

ननु अर्थस्य कोऽर्थः यज्ज्ञानमागमः प्रोच्यते। अर्थोऽनेकान्तः अनेके अन्ताः अनुवृत्तव्यावृत्तप्रत्ययगोचराः सामान्यविशेषादयो धर्मा यस्य सोऽनेकान्तः।

ननु आगमस्यापौरुषेयत्वान्नित्यत्वाच्च कथमाप्तवाक्यनिबन्धनत्वमितिचेन्न, आगमस्य सर्वथाऽपौरुषेयत्वनित्यत्वाभावात्। आ-

गमो हि द्रव्यादिसामान्यापेक्षया अनादिनिधन इष्यते, नहि केनचित् पुरुषेण क्वचित् कदाचित् कथंचिदुत्प्रेक्षितः। द्रव्यादिविशेषापेक्षया तु आदिरन्तश्च भवतीत्याप्तवाक्यनिबंधनत्वमागमस्योचितमेव।

अधुना प्रमाणस्वरूपसंख्यानिरूपणानतरं तद्विषयफलयोरपि किञ्चित् प्रस्तूयते। प्रमाणस्य विषयो हि सामान्यविशेषात्मकं वस्तु। न केवलं सामान्यं, नापि केवलो विशेषो, नापिद्वय स्वतन्त्रम्, किन्तु तदात्मकं वस्तु तस्यैव वस्तुत्वात्। तथाचोक्त–"अनुवृत्तव्यावृत्तप्रत्ययगोचरत्वात् पूर्वोत्तराकारपरिहारावाप्तिस्थितिलक्षणपरिणामेनार्थक्रियोपपत्तेश्च।" गौर्गौरित्यादिप्रत्ययोऽनुवृत्ताकारः। श्यामः शबल इत्यादि प्रत्ययश्च व्यावृत्ताकारः। वस्तु पूर्वाकार जहाति तदानीमेव चोत्तराकार स्वीकरोति द्रव्यात्मना च तदेव तिष्ठति। एतेन वस्तुनि चत्वारो धर्मा. सिद्धा भवंति। सामान्यद्वय विशेषद्वय चेति। एकं तिर्यक् सामान्यं सदृशपरिणामात्मकं खण्डमुण्डादिषु गोत्ववत्। परापरपर्यायव्यापिद्रव्यमूर्ध्वतः सामान्य द्वितीय, स्थासादिपर्यायेषु मृत्तिकावत्। तथैव एकः पर्यायाख्यो विशेषः एकस्मिन् द्रव्ये क्रमभाविपरिणामरूपः आत्मनि हर्षविषादादिवत्। द्वितीयोऽर्थान्तरगतविसदृश परिणामात्मको व्यतिरेकाख्योगोर्महिषादिवत्।

प्रमाणफल तु द्विविधं। साक्षात्फलमज्ञाननिवृत्तिः, परम्परया तु हानोपादानोपेक्षाः। तत्फल प्रमाणादभिन्नं भिन्नं च। यः प्रमिमीते तस्यैवाज्ञाननिवृत्तिर्भवति, स एव जहात्यादत्त उपेक्षते चेति प्रतीति सकलजनानुभवसिद्धा। अतः प्रमाणफलयोरभेद एव। करणक्रियापरिणामभेदात्तु भेद इति। प्रमाणं हि करणं, तत्फलं तु प्रमितिरूपा क्रिया इति।

॥ इति द्वितीयोऽध्यायः ॥

तृतीयोऽध्यायः

नयस्वरूपम्

प्रमाणनयैरधिगम इति पदार्थाधिगमहेतुत्वेन निर्दिष्टयोः प्रमाण-नययोः प्रमाणं व्याख्यातं। साम्प्रतं नयो व्याक्रियते।

नयो हि प्रमाणविकल्पः तस्य विकलादेशत्वात्। तथा चोक्तं-"सकलादेशः प्रमाणाधीनो विकलादेशो नयाधीनः।" प्रमाणतो वस्तु परिगृह्य परिणतिविशेषापत्त्याऽर्थावधारणं नयस्य प्रयोजनं। एतदेव स्पष्टयितुं शास्त्रकारैस्तस्यानेकानि लक्षणानि निरुक्तानि। तथा हि–वस्तुन्यनेकान्तात्मन्यविरोधेन हेत्वर्पणात् साध्यविशेषस्य याथात्म्यप्रापणप्रवणप्रयोगो नयः। अथवा नानास्वभावेभ्यो व्यावृत्य एकस्मिन् स्वभावे वस्तु नयति प्राप्नोतीति नयः। अथवा श्रुतप्रमाणविकल्पोनय.। ज्ञातुरभिप्रायोवा नयः। इमानि च सर्वाणि लक्षणानि एकमेवार्थं प्रतिपादयन्ति। प्रमाणं हि द्रव्यपर्या-यात्मकं सामान्यविशेषात्मकं वा वस्तु विजानाति। नयस्य तु न तादृशं सामर्थ्यं। स हि वस्तु विजानन् केवलं तस्य द्रव्यत्वांशं विजानीयात् पर्यायत्वांशं वा। तच्च न सकलं वस्तु, तादृशांशस्य विकलत्वात्। सकलं तु वस्तु द्रव्यपर्यायात्मकं। अत एव प्रमाणस्य सकलादेशत्वं नयस्य च विकलादेशत्वं सुप्रसिद्धं।

ननु स्वार्थनिश्चायकत्वान्नयः प्रमाणमिति चेन्न, तस्य स्वार्थैक-

देशनिर्णायलक्षणत्वात् प्रमाणाद्भिन्नत्वात्। ननु स्वार्थैकदेशो वस्तु अवस्तु वा, यदि वस्तु तर्हि तत्परिच्छेदको नयोऽप्रमाणं, यदि अवस्तु तर्हि तद्विषयो नयो मिथ्याज्ञानमिति न वक्तव्यं। स्वार्थैकदेशो हि न वस्तु नाप्यवस्तु अपितु वस्त्वंशः। यथा समुद्रैकदेशो न समुद्रो नाप्यसमुद्र अपि तु तस्यैक देशः। तन्मात्रो यदि समुद्रः तर्हि शेषांशो ऽसमुद्रः स्यात्। समुद्रबहुता वा भवेत्। तस्यासमुद्रत्वे तु क्व समुद्रवाग्विज्ञानप्रवृत्तिः। ननु नयो यदि वस्तुन एकमेवधर्मं गृह्णाति तर्हि तस्य मिथ्याज्ञानत्व स्यात्। वस्तुन एक ध र्मिकत्वाभाव त्। तद्धि अनेकान्तात्मकमस्तीति चेन्न, अनेकान्तात्मकस्याऽपि वस्तुन एक धर्मात्मिकत्वज्ञानमपि धर्मान्तरानिषेधकं सम्यग्ज्ञानमेव। तद्धीतर-धर्मनिषेधक मिथ्याज्ञान स्यादिति न नयस्य मिथ्याज्ञानत्व, तस्य सापेक्षत्वात्। ततो नयस्य स्वार्थैकदेशनिर्णायलक्षणत्व समीचीनम्।

एष नयो द्विविधो द्रव्यार्थिक. पर्यायार्थिकश्चेति। द्रव्यार्थिकस्य त्रयो भेदा., नैगमः सग्रहोव्यवहारश्चेति। निगमः सङ्कल्पस्तत्रभवो नैगमः। अय हि नयोऽनभिनिर्वृत्तार्थसकल्पमात्रग्राही, यथा जले न्धनादिग्राहरणे व्याप्रियमाणं कञ्चित पुरुष कश्चित् पृच्छति किं-करोति भवान् स आह ओदनं पचामीति किन्तु न तदौदनपर्यायः स ञ्जहितः तदर्थे व्याप्रियते सः। नैगमोऽयमन्योन्यगुणप्रधान-भूतभेदाभेदप्ररूपकः। सर्वथाऽभेदवादस्तु तदाभास। स्वजात्यविरोधे-नैकध्यमुपनीयाविशेषेण समस्तग्रहणात् सग्रह यथा सत्, द्रव्यं घट इत्यादि। सदित्युक्ते सर्वेषां सत्ताधारभूतानामविशेषेण सग्रहो भवति। द्रव्यमित्युक्ते जीवाजीवतद्भेदप्रभेदानां संग्रहः। घट इत्युक्ते सर्वेषां घटबुद्ध्यभिधानविषयभूतानां संग्रह.। संग्रहो हि

प्रतिपक्षव्यपेक्षो यावन्मात्रतज्जातीयपदार्थग्राहकः। सर्वथा सन्मात्रग्राही तु तदाभासः। समहगृहीतभेदकोव्यवहारः। यथा यत् सत् तद् द्रव्य गुणो वा। द्रव्यं तु जीवद्रव्यमजीवद्रव्यं वा। जीवाजीवावपि देवनारकादिर्घटादिश्चेति। काल्पनिको भेदस्तदाभासः।

पर्यायार्थिकस्य चत्वारोभेदा. ऋजुसूत्रः, शब्दः, समभिरूढः, एवंभूतश्चेति। ऋजु प्रगुणं वर्तमान सूत्रयतीति ऋजुसूत्रः। पूर्वापरान् त्रिकालविषयानतिशय्य वर्तमानकालविषयानादत्तेऽस्य नयः। अतीतानागतयोर्विनष्टानुत्पन्नत्वेन व्यवहाराभावात्।

ननु वर्तमानपर्यायमात्रग्राहकत्वादस्य नयस्य लोकसंव्यवहारलोपप्रसङ्ग इतिचेदत्रास्य नयस्य विषयमात्रप्रदर्शनं क्रियते। लोकसंव्यवहारस्तु सर्वनयसमूहसाध्यः। न चायमतीतानागतयोर्निषेधं करोति। प्रतिपक्षसव्यपेक्षशुद्ध (वर्तमान) पर्यायमात्रग्राहित्वादस्य। सर्वार्थैकान्तस्तु तदाभासः।

लिङ्गसंख्याकालादीनां भेदाच्छब्दस्य भेदकथनं शब्दनयः। दारा भार्या कलत्रमित्यत्र लिङ्गभेदात् त्रयाणां भिन्नत्व। जलमापो वर्षा ऋतु इत्यादौ सख्याभिन्नत्वाद् भिन्नत्वम्। विश्वदृश्वाऽस्य पुत्रो जनिता भाविकृत्यमासीदित्यादौ कालभिन्नत्वाद् भिन्नत्वम्। अर्थभेदं विना शब्दानामेव नानात्वैकान्तस्तदाभासः।

पर्यायभेदात् पदार्थनानात्वनिरूपकः समभिरूढनयः। शब्दभेदश्चेदस्ति अर्थभेदेनाऽपि अवश्यं भवितव्यम्। अन्यथा शब्दभेदस्य निरर्थकत्वं स्यात्। इन्दनादिन्द्रः, शकनाच्छक्रः, पूर्दारणात् पुरन्दरः

इत्यादिषु शब्दभेदादर्थभेदोऽप्यस्त्येव। अथवा नानाऽर्थान् समेतीत्येकमर्थमाभिमुख्येन रूढः समभिरूढः, यथा गोरित्यय शब्दो यद्यपि वागाद्यनेकार्थेषु वर्तते तथापि पशुविशेषे रूढः। अथवा यो यत्र वर्तते स तत्र समेत्याभिरूढः समभिरूढ, यथा क्व भवानास्ते स आह आत्मनीति। यद्यन्यस्यान्यत्र वृत्तिः स्यात् ज्ञानादीनां रूपादीनां चाकाशे वृत्तिर्भवेत्। पर्यायनानात्वमन्तरेणापीन्द्रादिभेदकथन समभिरूढाभासः।

क्रियाश्रयेण भेदप्ररूपणमेवभूत.। एतन्नयापेक्षया स्वाभिधेयक्रियापरिणतिक्षण एव स शब्दो युज्यते नान्यदा। यदैवेन्दति तदैवेन्द्रो नाभिषेचको न पूजकः। यदैव गच्छति तदैव गौर्न स्थितो न शयित इति। क्रियानिरपेक्षत्वेन क्रियावाचकेषु काल्पनिकोव्यवहारस्तदाभासः।

एषु पूर्वे चत्वारोऽर्थनया अर्थप्रधानत्वात्। अर्थप्रधानत्व च शब्दापेक्षां विनाऽर्थप्ररूपणमात्रपरत्वं। अवशिष्टाश्च त्रयः शब्दनयाः शब्दप्रधानत्वात शब्दप्रधानत्व च शब्दापेक्षयाऽर्थप्ररूपकत्व। एते सर्वेऽपि नयाः पूर्वपूर्वमहाविषयाः उत्तरोत्तराऽल्पविषयाश्चेति। तथाहि नैगमनयात् संग्रहोऽल्पविषयः सन्मात्रग्राहित्वात्तस्य। नैगमस्तु भावाभावविषयत्वाद् बहुविषयः। यथैव नैगमस्य भावे संकल्पस्तथाऽभावेऽपि। व्यवहारः संग्रहादपि अल्पविषयः तद् भेदप्रभेदविषयत्वात्। संग्रहस्तु बहुविषयोऽभेदगोचरत्वात्। ऋजुसूत्रस्ततोऽप्यल्पविषयो वर्तमानपर्यायमात्रविषयत्वात्। व्यवहारस्तु त्रिकालविषयत्वाद्बहुविषयः। ऋजुसूत्र लिंगादिभेदेनाप्यभि नार्थभेदः स्वीक्रियतेऽतः शब्दनयस्तस्मादल्पविषयः। ऋजुसूत्रस्तु बहुविषयः।

पर्यायभेदेनाभिन्नमर्थं प्रतिपादयतः शब्दाद् बहुविषयात् समभिरूढः सूक्ष्मविषयः । स हि पर्यायभेदेन भिन्नमर्थं व्यनक्ति । क्रियाभेदेऽपि चाभिन्नमर्थं कथयतः समभिरूढादेवंभूतो बहुविषय तस्य ततोऽल्पविषयत्वात् । एते नया गुणप्रधानतया: परस्परतंत्राः सम्यग्दर्शनहेतवो भवन्ति । एतच्च सर्वं नयानां प्ररूपणमागमभाषया व्यवहारापेक्षया ।

अध्यात्मभाषया तु मूलनयौ द्वौ, निश्चयो व्यवहारश्चेति । तत्र निश्चयोऽभेदविषयो, व्यवहारस्तु भेदविषयः । निश्चयोऽपि द्विविधः, शुद्धनिश्चयोऽशुद्धनिश्चयश्च । निरुपाधिकगुणगुण्यभेदविषयकः शुद्धनिश्चयो यथा केवलज्ञानादयो जीवः । सोपाधिकतदभेदविषयकोऽशुद्धनिश्चयो यथा मतिज्ञानादयो जीवः । व्यवहारो द्विविधः सद्भूतव्यवहारोऽसद्भूतव्यवहारश्च । तत्रैकवस्तुभेदविषयः सद्भूतव्यवहारः । भिन्नवस्तुविषयोऽसद्भूतव्यहारः । सद्भूतव्यवहारोऽपि द्विविधः, उपचरितानुपचरिभेदात् । तत्र सोपाधिकगुणगुणिनोर्भेदविषय उपचरितसद्भूतव्यवहारो यथा जीवस्य मतिज्ञानादयोगुणाः । निरुपाधिक गुणगुणिनोर्भेदविषयोऽनुपचरितसद्भूतव्यवहारो, यथा जीवस्य केवलज्ञानादयो गुणाः । असद्भूतव्यवहारोऽपि द्विविधः उपचरितानुपचरितभेदात् । तत्राऽसंश्लिष्टवस्तुसंबधविषयः प्रथमो यथा देवदत्तस्य धनम् । संश्लिष्टवस्तुसंबन्धगोचरश्च द्वितीयो यथा जीवस्य शरीरम् ।

स्याद्वादनिरूपणम्

वादः सिद्धान्तः । स्यात्प्रधानो वादः स्याद्वादः । स्यादित्ययं निपा-

तोऽनेकान्तवाचको द्योतको वा क्वचित् प्रयुज्यमानस्तद्विशेषणतया प्रकृतार्थे तत्त्रमवयवेन सूचयति प्रायशो निपातानां तत्स्वभावत्वा-देवकारादिवत्। स्याद्वादोहि सर्वथैकान्तत्यागात् सप्तभगनयापेक्षः स्वभावपरभावाभ्यां वस्तुन सदसदादिव्यवस्थां प्रतिपादयति। वस्तु हि न केवलं सत्, नापि केवलमसत्, अपि तु सदसदात्मक द्रव्य-पर्यायात्मक सामान्यविशेषात्मक नित्यानित्यात्मकमस्ति। वस्तुन. उभयात्मकत्व. तद्विस्तरत: सप्तभगात्मकत्व च प्रतीतिसिद्ध।

स्याद्वादो हि जैनागमस्य बीज। तत्र वस्तुव्यवस्थायां सर्वत्रा-स्याप्रतिहतव्यापारस्वीकारात्। एतदवलम्बनेनासत्यमपि सत्य स्यात। एतत्तिरस्कारे तु सत्यमप्यसत्यमिति। निराग्रहवादोऽय सर्वान विग्र-हान् निराकर्तुं क्षमः। एतदुपयोगेन त्रिषष्टिशतत्रयपाखण्डा अपि समीचीनतां भजन्ते। एतदभावे तु न कदाचिदपि सत्यदर्शन भवेत। यथा षडन्धाः हस्तिनः पुच्छपादमस्तकाद्यवयवान् परिगृह्य तस्यान्यथा कल्पनां चक्रुस्तथैव स्याद्वादचक्षुर्विरहिताः पदार्थं याथार्थ्येन ज्ञातु मशक्नुवन्तस्यान्यथाकल्पन विदधति। न चास्य स्याद्वादस्यानेकान्त-वादापरनामधेयस्य केवल शास्त्रेष्वेवोपयोगो। वस्तुतस्तु इमं विना लोकस्य व्यवहारोऽपि न सर्वथा सम्पादनीयो भवेत्। अत एवोक्तः—

जेण विणा लोगस्स वि ववहारो सव्वहा ण णिव्वडई।
तस्स भुवणेकगुरुणो णमो अणेगंतवायस्स॥"

एकस्मिन्नेव पुरुषे युगपदेव पितृत्वपुत्रत्वमातुलत्वभागिनेयत्व-पितामहत्वपौत्रत्वमातामहत्वनेप्तृत्वज्येष्ठत्वकनिष्ठत्वादयोऽनेके धर्मा

विभिन्नपुरुषापेक्षया वर्तन्ते। तादृशो व्यवहारश्चापि भवति। यद्य-यमाग्रहः स्यात् य पिता स पितैव तदा तु तस्य सत्ताऽपि संदिग्धा भवेत्। एकस्मिन्नेव काले आमलकमाम्रापेक्षया सूक्ष्म बदरापेक्षया च स्थूल प्रतीयते। रङ्को मनुष्यत्वापेक्षया गजसदृश शासकशालि-तापेक्षया च तयोर्महान भेदः इति सर्वत्रानेकान्तशासन लोकव्यवहार प्रतीतिसिद्धम्। तथैव शास्त्रे पदार्थानां नित्यत्वानित्यत्वादिविचारावसरे ऽस्योपयोगोभवत्येवानादृतोऽपि। न खलु यो द्रव्यापेक्षया नित्यः स पर्यायापेक्षयाऽपि नित्यः स्यात्। अन्यथा सुवर्णवत् तन्निर्मिताभूष-णस्यापि नित्यत्व भवेत्। तथैव य पर्यायापेक्षयाऽनित्यः स न द्रव्यापेक्षयाऽपि अनित्योऽन्यथाऽऽभूषणवत काञ्चनस्याऽपि विनाशो भवेत्। वस्तु सामान्यात्मना नोदेति, विशेषात्मना तु व्येति उदेति च। न खलु काञ्चन काञ्चनत्वेन समुत्पद्यते, आभूषणत्वेन तु समुत्प द्यते विनश्यति च। तत एवोत्पादव्ययध्रौव्यत्रयमेकत्र युगपत् सम्भ-वति। घटमौलिसुवर्णार्थी जनोऽय घटनाशमौल्युत्पादसुवर्णस्थि-तिषु सहतुकमेव शोकप्रमोदमाध्यस्थ्य याति। गोरसत्वेऽपि दधि-पयसोर्भिन्नत्वात पयोव्रतो दधि नात्ति नापि दधिव्रतः पयोऽत्ति। अगोरसव्रतस्तु द्वयमपि नात्ति, तस्मात्तत्त्वस्य त्रयात्मकत्वान्नित्यानित्या-त्मकत्वमिति। तथा चोक्त स्वामिसमन्तभद्राचार्येणः —

घटमौलिसुवर्णार्थी नाशोत्पादस्थितिष्वयम्,
शोकप्रमोदमाध्यस्थ्यं जनो याति सहेतुकम्।
पयोव्रतो न दध्यत्ति न पयोऽत्ति दधिव्रतः,
अगोरसव्रतो नोभे तस्मात्तत्त्वं त्रयात्मकम्।

सप्तभंगीविवेचनम्

प्रमाणनयैरधिगम इत्यनेन द्विविधोऽधिगमः प्रतिपादितः, प्रमाणात्मको नयात्मकश्चेति। साकल्येन तत्त्वाधिगमः प्रमाणात्मकः देशतस्तत्त्वाधिगमो नयात्मकः। अथ द्विविधोऽपि भेदः सप्तधा प्रवर्तते विधिप्रतिषेधप्राधान्यात्। इयमेव च प्रमाण सप्तभंगी नयसप्तभंगीति च व्यवह्रियते। सप्तानां भङ्गानां—वाक्यानां समाहारः—समूहः सप्तभंगीतितदर्थः। तानि च वाक्यानि—स्यादस्त्येवघटः, स्यान्नास्त्येवघटः स्यादस्ति नास्ति च घटः, स्यादवक्तव्य एव घटः, स्यादस्ति चावक्तव्यश्च, स्यान्नास्ति चावक्तव्यश्च, स्यादस्ति नास्ति चावक्तव्यश्च। इमे सप्तापि भगा एकस्मिन्नेव वस्तुनि अविरोधेन विधिप्रतिषेधकल्पनया प्रश्नवशादवतारयितु शक्यन्ते। तथा चाहुरकलङ्कदेवाः—
"प्रश्नवशादेकत्र वस्तुनि अविरोधेन विधिप्रतिषेधकल्पना सप्तभंगी।"

ननु प्रश्नानां सप्तविधत्व कथमितिचेत्, जिज्ञासानां सप्तविधत्वात्। ननु कुतः सप्तधैव जिज्ञासेतिचेत्, सप्तधा संशयानामुत्पत्तेः। संशयानां सप्तविधत्व तु तद्विषयीभूतधर्माणां सप्तविधत्वात्। तादृशधर्माश्च कथञ्चित्सत्त्व, कथञ्चिदसत्त्वं, क्रमार्पितोभय, अवक्तव्यत्व, कथंचित्सत्त्वविशिष्टावक्तव्यत्व कथंचिदसत्त्वविशिष्टावक्तव्यत्व, क्रमार्पितोभयविशिष्टावक्तव्यत्वम् चेति सप्तैव। एवं च दर्शितधर्मविषयका सप्तैव संशयाः। तथा चोक्त —

"भङ्गाः सत्त्वादयः सप्त, संशयाः सप्त तद्गताः।
जिज्ञासाः सप्त सप्त स्युः प्रश्नाः सप्तोत्तराण्यपि।"

अत्र घटः स्यादस्त्येव वा नवेति कथंचित्सत्त्वतदभावकोटिकः प्रथम. संशयः।

ननु कथंचित्सत्त्वस्याभावः कथंचिदसत्त्व, तस्य न संशयविषयत्व सभवः कथंचित्सत्त्वेन सह विरोधाभावात्, तथा च कथं प्रथमः संशय इति चेत्—दर्शितसशये कथञ्चिदस्तित्व—सर्वथाऽस्तित्वयोरेवको- टिता। तयोश्च परस्परं विरोधाश्चोक्तानुपपत्ति.। एव द्वितीयादि संशयप्रकारा अपि ज्ञातव्याः।

ननु भमग्यां सप्तविधत्वसिद्ध्यभावे नैतत् सर्वमुपपन्न भवति। तत्सप्तविधत्वसिद्धिश्च न संभवेत्। प्रथमद्वितीयधर्मवत् प्रथमतृतीया- दिधर्माणां क्रमाक्रमार्पितानां धर्मान्तरत्वसिद्धेः सप्तविधधर्मनियमा- भावात, इति चेन्न, क्रमाक्रमार्पितयोः प्रथमतृतीयधर्मयोर्धर्मान्तर- त्वेनाप्रतीतेः। स्यादस्ति घट इत्यादौ घटत्वावच्छिन्नसत्त्वद्वयस्या- सभवात। मृण्मयत्वाद्यवच्छिन्नसत्त्वान्तरस्य संभवेऽपि दारुमय- त्वाद्यवच्छिन्नस्यापरस्यासत्त्वस्यापि संभवादपरधर्मसप्तकसिद्धेः सप्त- भग्यन्तरस्यैव सभवात्। एतेन प्रथमद्वितीयधर्मयोः क्रमाक्रमा- र्पितयोर्धर्मान्तरत्वमपि निरस्तम्। एकरूपावच्छिन्ननास्तित्वद्वया- संभवात्।

नन्वेव प्रथमचतुर्थयोर्द्वितीयचतुर्थयोस्तृतीयचतुर्थयोश्च सहितयोः कथं धर्मान्तरत्वम्। अवक्तव्यत्वं हि सहार्पितास्तित्वनास्तित्वोभयं, तथा च यथा क्रमार्पितास्तित्वोभयास्मिन्नस्तित्वस्य योजनं न संभवति अस्तित्वद्वयाभावात्, तथा सहार्पितोभयस्मिन्नपीति चेन्न। यतो

अवक्तव्यत्वं सहार्पितोभयमेव न किन्तु सहार्पितयोरस्तित्वनास्तित्वयोः सर्वथा वक्तुमशक्यत्वरूप धर्मान्तरमेव तथा च सत्त्वेन सहितम-वक्तव्यत्वादिक धर्मान्तर प्रतीतिसिद्ध ।

ननु-अवक्तव्यत्वं यदि धर्मान्तर, तर्हि वक्तव्यत्वमपि धर्मान्तर स्यात् तथा चाष्टमस्य वक्तव्यत्वधर्मस्य सद्भावेन तेनसहाष्टभंगी स्यान्न सप्तभंगीति चेन्न—

सामान्येन वक्तव्यत्वस्यातिरिक्तस्याभावात् सत्त्वादिरूपेण वक्त-व्यत्वं तु प्रथमभंगादावेवान्तर्भूतम् । यदि वक्तव्यत्वं नाम कश्चनाति-रिक्तो धर्मः स्वीक्रियेत तदा वक्तव्यत्वाऽवक्तव्यत्वाभ्यां विधिप्रति षेधकल्पनाविषयाभ्यां सत्त्वाऽसत्त्वाभ्यामिव सप्तभंग्यन्तरमेव प्राप्नो-तीति न सत्त्वाऽसत्त्वादि सप्तविधधर्मव्याघातप्रसङ्गः ।

नन्वेवमधिकसंख्याव्यवच्छेदेऽपि न्यूनसंख्याव्यवच्छेद कथं सिद्ध्येत ? सत्त्वाऽसत्त्वयोर्भेदाभावात् । यत् स्वरूपेण सत्त्व तदेव पररूपेणाऽसत्त्व । तथा च न प्रथमद्वितीयभंगौ घटेते, ततस्तृतीयादि-भंगाभावात् कुतः सप्तभंगीतिचेन्न ।

अत्रोच्यते स्वरूपाद्यवच्छिन्नसत्त्व पररूपाद्यवच्छिन्नमसत्त्वमि-त्यवच्छेदकभेदात्तयोर्भेदसिद्धेः, अन्यथा स्वरूपेणेव पररूपेणाऽपि सत्त्वप्रसंगात । पररूपेणेव स्वरूपेणाऽप्यसत्त्वप्रसंगात् । एवमेवे तरभंगेष्वपि भिन्नत्वं ज्ञातव्य । नहि सत्त्वमेव वस्तुनः स्वरूपं, स्वरूपा-दिभिः सत्त्वस्येव पररूपादिभिरसत्त्वस्यापि प्रतिपत्तेः । नाप्यसत्त्वमेव, स्वरूपादिभिः सत्त्वस्यापि प्रतीतिसिद्धत्वात । नापि तदुभयमेव,

तदुभयविलक्षणस्यापि जात्यन्तरस्य वस्तुनोऽनुभूयमानत्वात्। यथा दधिगुडचातुर्जातकादिद्रव्योद्भव पानकं केवलं दधिगुडाद्यपेक्षया जात्यन्तरत्वेन पानकमिदं सुस्वादु सुरभीति प्रतीयते। तथा च विधि-कल्पभावानां सप्तधर्माणां तद्विषयसंशयजिज्ञासादिक्रमेण समोत्तर-रूपा सप्तभंगी सिद्धति।

इयं च सप्तभंगी द्विविधा, प्रमाणसप्तभंगी नय सप्तभंगी चेति। किं पुन. प्रमाणवाक्यं किं वा नयवाक्यमिति चेत्।—

एकधर्मबोधनमुखेन तदात्मकानेकाशेषधर्मात्मकवस्तुविषयक-बोधजनकवाक्यत्वं सकलादेशत्वं। तदुक्तं—"एकगुणमुखेनाशेषवस्तुरूप सग्रहात् सकलादेश ।"

अस्यायमर्थः यदाऽभिन्नं वस्तु एकगुणरूपेणोच्यते गुणिनां गुण-रूपमन्तरेण विशेषप्रतिपत्तेरसंभवात् तदा सकलादेशः। एकोहि जीवोऽस्तित्वादिष्वेकस्य गुणस्य रूपेण अभेदवृत्त्या अभेदोपचारेण वा निरंश. समस्तो वक्तुमिष्यते। विभागनिमित्तस्य तत्प्रतियोगिनो गुणान्तरस्याविवक्षितत्वात्। कथमभेदवृत्तिः कथंचाभेदोपचारः इति चेत्—द्रव्यार्थत्वेनाश्रयणे तदव्य तरेकादभेदवृत्तिः। पर्यायार्थत्वेना-श्रयणे परस्परव्यतिकरेऽप्येकत्वारोपादभेदोपचारः। इति।

अभेदवृत्त्यभेदोपचारयोरनाश्रयणे एकधर्मात्मकवस्तुविषयबोध-जनक वाक्यं विकलादेशः।

तत्र स्वरूपादिभिरस्तित्ववन्नास्तित्वमपि स्यादित्यनिष्टार्थनिवृत्त्यर्थं स्यादस्त्येवेति एवकारः कर्तव्यः। तेन स्वरूपादिभिरस्तित्वमेव न ना-

स्तित्वमित्यवधार्यते। स चैवकारस्त्रिविधः अयोगव्यवच्छेदबोधकः, अन्ययोगव्यवच्छेदबोधकः, अत्यन्तायोगव्यवच्छेदबोधकश्चेति। तत्र विशेषणसङ्गतैवकारोऽयोगव्यवच्छेदबोधको यथाशङ्खः पाण्डुर एव। विशेष्यसङ्गतैवकारोऽन्ययोगव्यवच्छेदबोधको–यथा पार्थ एव धनुर्धरः। क्रियासङ्गतैवकारोऽत्यन्तायोगव्यवच्छेदबोधको यथा–नीलं सरोजं भवत्येव। स्यादस्त्येव घट इत्यादौ यद्यपि क्रियासङ्गतैवकारस्तथापि नात्यन्तायोगव्यवच्छेदकः, अनिष्टापत्तेः। कस्मिंश्चिद् घटेऽस्तित्वस्याभावेऽपि तादृशप्रयोगसम्भवात्। अतोऽत्र क्रियासङ्गतत्वेऽपि अयोगव्यवच्छेदकैवकारः स्वीकृतः। ज्ञानमर्थं गृह्णात्येवेत्यादौ क्रियासङ्गतत्वेऽपि तादृशैवकारस्वीकारात्।

स्याच्छब्दस्य चानेकान्तविधिविचारादिष्वनेकेष्वर्थेषु सम्भवत्सु विवक्षावशात्त्रानेकान्तार्थो गृह्यते। अनेकान्तत्वं नामानेकधर्मात्मकत्वं। न च—स्याच्छब्देनैवानेकान्तस्य बोधनेऽस्त्यादिवचनमनर्थकमितिवाच्य। स्याच्छब्देन सामान्यतोऽनेकान्तबोधनेऽपि विशेषरूपेण बोधनार्थमस्त्यादिशब्दप्रयोगात्।

घटः स्वद्रव्यक्षेत्रकालभावैरस्ति, परद्रव्यक्षेत्रकालभावैश्चनास्तीत्यस्य कोऽर्थः इतिचेत्, घटो घटत्वेनास्ति पटत्वेन नास्ति। मृद्द्रव्येणास्ति सुवर्णद्रव्येण नास्ति। स्वक्षेत्रादस्ति परक्षेत्रान्नास्ति। स्वकालादस्ति परकालान्नास्तीति।

ननु प्रमेयस्य किं स्वरूप किं पररूपमितिचेत्—प्रमेयस्य प्रमेयत्वादिकं स्वरूपं घटत्वादिकं पररूपम्। प्रमेयं प्रमेयत्वेनास्ति घटत्वादिना नास्ति। तथैव जीवादिद्रव्याणां मध्ये एकं सद्द्रव्यमपेक्ष्यास्तित्वं,

तत्प्रतिपक्षं सद्भावमशुद्धद्रव्यमपेक्ष्य नास्तित्वञ्चोपपद्यते । महासत्त्वरूपस्याशुद्धद्रव्यस्य सकलद्रव्यक्षेत्रकालाद्यपेक्षया सत्त्वस्य विकलद्रव्याद्यपेक्षयाऽसत्त्वस्य च व्यवस्थितेः । एवमेव सकलक्षेत्रकालव्यापिन आकाशस्य सकलकालक्षेत्राद्यपेक्षया सत्त्वं यत्किञ्चित् क्षेत्रकालाद्यपेक्षयाऽसत्त्वं च ज्ञातव्यम् ।

ननु—अस्तित्वमेव वस्तुनः स्वरूपं न पुनर्नास्तित्वं तस्य पररूपाश्रयत्वात् । यदि पररूपाश्रितमपि नास्तित्वं वस्तुनः स्वरूपं तदा पटगतरूपादिकमपि घटस्य स्वरूपं भवेत्, इति चेन्न; उभयस्याऽपि स्वरूपत्वे प्रमाणसद्भावात् । घटस्य स्वरूपाद्यपेक्षयाऽस्तित्वं, पररूपाद्यपेक्षया च नास्तित्वं प्रत्यक्षेणैवानुभूयते । अनुमानसिद्धं चैतत्—अस्तित्वं स्वभावेन नास्तित्वेनाविनाभूतं विशेषणत्वात्, साधर्म्यवत् । अविनाभूतत्वं च नियमेनैकाधिकरणवृत्तित्वं । घटोऽभिधेयः प्रमेयत्वादित्यादिसाधर्म्यहेतावपि वैधर्म्यमस्त्येव, अभिधेयत्वाभावाधिकरणे गगनकुसुमादौ अवृत्तिमत्त्वेन निश्चितत्वं प्रमेयत्वस्य वर्तत इति तादृशहेतोर्वैधर्म्यमक्षतमिति । एवं नास्तित्वं स्वभावेनास्तित्वेनाविनाभूतं विशेषणत्वात्, वैधर्म्यवदित्यनुमानेनाऽपि तयोरविनाभावसिद्धिः ।

ननु पृथिवीतरेभ्यो भिद्यते गन्धवत्त्वादित्यादिकेवलव्यतिरेकिहेतौ वैधर्म्यं साधर्म्येण विनाऽपि दृश्यते इति प्रोक्तानुमाने न दृष्टान्तसङ्गतिरिति चेन्न, केवलव्यतिरेकिहेतावपि साधर्म्यस्य पक्षद्वारैव संभवात् । पक्षभिन्न एव साधर्म्यं न पक्ष इति नियमाभावात् । इति भङ्गद्वयम् ।

घटः स्यादस्ति नास्ति चेति तृतीयः, क्रमार्पितस्वपररूपाद्यपेक्षया ऽस्तिनास्त्यात्मको घट इति। सहार्पितस्वपररूपादिविवक्षायां स्यादवाच्यो घटः सह वक्तुमशक्यत्वादिति चतुर्थभङ्गः। व्यस्तं द्रव्यं सहार्पितौ द्रव्यपर्यायौ चाश्रित्य स्यादस्ति चावक्तव्य एव घट इति पंचमभङ्गः व्यस्तं पर्यायं समस्तौ द्रव्यपर्यायौ चाश्रित्य स्यान्नास्ति चावक्तव्य एव घट इति षष्ठो भङ्गः। एवं व्यस्तौ क्रमार्पितौ समस्तौ सहार्पितौ द्रव्यपर्यायावाश्रित्य स्यादस्ति नास्ति चावक्तव्य एवघट इति सप्तमो भङ्गः।

अत्र द्रव्यमेव तत्त्वं, अतः स्यादस्तीतिभङ्ग एक एवेति सांख्यमतं न युक्तं, पर्यायस्यापि प्रतीतिसिद्धत्वात्। तथा पर्याय एव तत्व, अतः स्यान्नास्तीतिभङ्गः एवेति सौगतमतमपि न युक्तियुक्तं द्रव्यस्यापि प्रतीतिसिद्धत्वात्। एवमवक्तव्यमेव वस्तुतत्त्वमित्यवक्तव्यैकान्तोऽपि सदामौनव्रतिकोऽहमितिवत् स्ववचनबाधितः। एवमन्येषामप्येकान्तानां प्रतीतिबाधितत्वादनेकान्तवाद एव श्रेयान्।

ननु च—अनेकान्तेऽपि विधिप्रतिषेधरूपा सप्तभंगी प्रवर्तते न वा। प्रथमपक्षेऽनेकान्तस्य निषेधकल्पनायामेकान्तः स्यादिति तत्पक्षोक्तदोषानुषङ्ग, अनवस्था च। तादृशैकान्तस्याप्यपरानेकान्तकल्पनया विधिप्रतिषेधयोः सिद्धार्थत्वात्। यदि सा न प्रवर्तते तर्हि निखिलं वस्तु सप्तभङ्गीसमाक्रान्तमिति सिद्धान्तव्याघातः इति चेन्न प्रमाणनयविवक्षाभेदात्तत्राऽपि तत्प्रवृत्तेः। तथाहि—एकान्तो द्विविधः सम्यगेकान्तो मिथ्यैकान्तः। अनेकान्तोऽपि द्विविधः सम्यगनेकान्तो मिथ्यानेकान्त इति। तत्र सम्यगेकान्तस्तावत्प्रमाण-

विषयीभूतानेकधर्मात्मकवस्तुनिष्ठैकधर्मग्राहको धर्मान्तरानिषेधकः । मिथ्यैकान्तस्त्वेकधर्ममात्रावधारणेनान्याशेषधर्मनिराकरणपरः । एवमेकत्र वस्तुन्यस्तित्वनास्तित्वादिनानाधर्मनिरूपणप्रवणः प्रत्यक्षानुमानागमाविरुद्धः सम्यगनेकान्तः । प्रत्यक्षादिविरुद्धानेकधर्मपरिकल्पनं मिथ्यानेकान्तः । तत्र सम्यगेकान्तो नयः । मिथ्यैकान्तो नयाभासः । सम्यगनेकान्तः प्रमाणं, मिथ्यानेकान्तः प्रमाणाभास इति कथ्यते ।

तथा च सम्यगेकान्तसम्यगनेकान्तावाश्रित्य प्रमाणनयविवक्षाभेदात् स्यादेकान्तः स्यादनेकान्त इत्यादिसप्तभङ्गी कल्पनीया । इयं च सप्तभङ्गी नित्यत्वानित्यत्वैकत्वानेकत्वादिधर्मेष्वपि निरूपणीया । यथा स्यान्नित्यो घटः स्यादनित्यो घट इतिमूलभंगद्वय । घटस्य द्रव्यरूपेण नित्यत्वात् पर्यायरूपेणानित्यत्वात् । तथैव स्यादेको घटः स्यादनेको घट इतिमूलभगद्वयं । मृद्द्रव्यरूपेण घटस्यैकत्वं स्थासकोशकुसूलादिपर्यायेषु तस्यैकत्वात् । पर्यायरूपेणानेको घटः रूपरसाद्यनेकपर्यायात्मकत्वाद् घटस्य ।

नन्वयमनेकान्तवादश्छलमात्रमेव, तदेवास्ति तदेव नास्ति तदेव नित्यं तदेवानित्यमिति प्ररूपणारूपत्वादस्येति चेन्न—छललक्षणाभावात् । अभिप्रायान्तरेण प्रयुक्तस्य शब्दस्यार्थान्तरं परिकल्प्य दूषणाभिधानं छलमिति छलसामान्यलक्षणम् । यथा नवकम्बलोऽयं देवदत्त इति वाक्यस्य नूतनाभिप्रायेण प्रयुक्तस्यार्थान्तरमाशंक्य कश्चिद् दूषयति—नास्य नव कम्बलाः सन्ति दरिद्रत्वात् । द्विकम्बलवत्त्वमपि न संभाव्यतेऽस्य कुतो नवेति । अनेकान्तवादे तु तादृशछलकल्पनायाः प्रसंग एव नास्ति ।

अथ संशयहेतुरनेकान्तवादः, एकस्मिन् वस्तुनि विरुद्धानामस्तित्वनास्तित्वादिधर्माणामसंभवात् । यथा स्थाणुर्वा पुरुषोवेत्याकारकं ज्ञानं संशयः एकधर्मिविशेष्यकस्थाणुत्वतदभावप्रकारकज्ञानत्वात् तथैवाऽयमपि, इति चेन्न—विशेषलक्षणोपलब्धेः । संशयो हि सामान्यप्रत्यक्षाद् विशेषाप्रत्यक्षाद् विशेषस्मृतेश्च जायते । अनेकान्तवादे तु विशेषोपलब्धिः प्रतिहता एव । स्वरूपपररूपादिविशेषाणां प्रत्यक्षमुपलभात् । तस्माद् विशेषोपलब्धेरनेकान्तवादो न संशयकारणमिति ।

ननु—अनेकान्तवादे विरोधादयोऽष्टौ दोषाः संभवन्ति । तथाहि एकत्रार्थे विधिप्रतिषेधरूपयोरस्तित्वनास्तित्वधर्मयोर्न संभवः । भावाभावयोः परस्परं विरोधादिति विरोधदोषः । अस्तित्वस्याधिकरणमन्यन्नास्तित्वस्याधिकरणमन्यदित्यस्तित्वनास्तित्वयोर्वैयधिकरण्यम्—तस्य विभिन्नाधिकरणवृत्तित्वादिति द्वितीयोदोषः । येन रूपेणास्तित्व येन च रूपेण नास्तितत्व तादृशरूपयोरपि प्रत्येकमस्तित्वनास्तित्वात्मकत्व वक्तव्यं, तच्च स्वरूपपररूपाभ्यां, तयोरपि प्रत्येकमस्तित्वनास्तित्वात्मकत्वं स्वरूपपररूपाभ्यामित्यनवस्था । अप्रामाणिकानन्तपदार्थपरिकल्पनाविश्रान्त्यभावोऽनवस्थेति प्रोच्यते । येन रूपेण सत्त्वं तेन रूपेणासत्त्वस्यापि प्रसङ्ग । येन रूपेण चासत्त्वं तेन रूपेण सत्त्वस्याऽपि प्रसक्तिरिति सङ्करः । सर्वेषां युगपत्प्राप्तिः सङ्कर इत्यभिधानात् । येन रूपेण सत्त्व तेन रूपेणासत्त्वमेव स्यान्न तु सत्त्व, येन रूपेणासत्त्वं तेन सत्त्वमेव स्यान्नत्वसत्त्वमिति व्यतिकरः, परस्पर विषयगमनं व्यतिकर इति वचनात् । सत्त्वासत्त्वात्मकत्वे च वस्तुन इदमित्थमेवेति निश्चेतुमशक्यः संशयः । ततश्चानिश्चयरूपाऽप्रतिपत्तिः । ततः सत्त्वासत्त्वात्मनो वस्तुनोऽभाव इति ।

अत्रोच्यते—विरोधो ह्यनुपलम्भसाध्यः। वस्तुनि स्वपररूपाद्यपेक्षया कथञ्चित्प्रतीयमानयोः सत्त्वासत्त्वयोः को विरोधः। न हि स्वरूपादिना वस्तुनः सत्त्वे तदैव पररूपादिभिरसत्त्वस्यानुपलंभोऽस्ति, द्वयोर्निर्बाधमुपलंभात्।

विरोधो हि त्रिधा व्यवतिष्ठते—एको वध्यघातकभावलक्षणो यथा अहिनकुलयोर्जलानलयोर्वा। द्वितीयःसहानवस्थानरूपो यथा एकस्मिन्नाम्रफले श्यामतापीततयोः। अनयोः सहावस्थानासंभवात्। तृतीयः प्रतिबध्यप्रतिबन्धकभावात्मा यथा सति मणिरूपप्रतिबन्धके वह्निना दाहो न जायते इति मणिदाहयोः प्रतिबध्यप्रतिबन्धकभावाख्यो विरोधः। त्रिविधोऽप्येष विरोधोऽस्तित्वनास्तित्वयोर्वस्तुनि सर्वदानुभूयमानयोर्न प्रतीतिगोचरो भवति।

एतेन वैयधिकरण्यमपि निरस्तं सत्त्वासत्त्वयोरेकाधिकरणतया प्रतीतिसिद्धत्वात्। अनवस्थादोषोऽपि नानेकान्तवादिनां संभवति। अनन्तधर्मात्मकवस्तुनः स्वयं प्रमाणप्रतिपन्नत्वेनाभ्युपगमात् नाप्रामाणिकपदार्थपरम्परापरिकल्पनारूपमनवस्थानम्। एतेन संकरव्यतिकरावपि प्रत्युक्तौ, प्रतीतिसिद्धे वस्तुनि कस्यापि दोषस्याभावात्। दोषा हि प्रतीत्यसिद्धपदार्थगोचरा भवन्ति। प्रतीतिसिद्धे संशयाऽप्रतिपत्त्यभावानामप्यवकाशो नास्तीति पूर्वोक्ताष्टदोषसंभावनालेशोऽपि न विद्यते।

इमामनेकान्तप्रक्रियां प्रवादिनोऽपि स्वीकुर्वन्त्येव वस्तुतोऽगत्या। यद्यपि कण्ठतस्तैरस्या विरोधः कृतः किंत्वेकानेकात्मकतत्त्वस्वीकारादस्याः सर्वत्रानुसरणं कृतम्। तथाहि:—

सांख्यास्तावत् सत्त्वरजस्तमसां साम्यावस्था प्रकृतिरिति कथयन्ति। तेषां मते प्रसादलाघवशोषतापवारणादिभिन्नस्वभावानामनेकात्मतानेकप्रधानात्मकत्वेनैकाकारेणैकानेकात्मकत्वं तुनः स्वीकारात्। समुदायसमुदायिनोरभेदात् समुदायिनां गुणानामनेकेषां समुदायस्य चैकस्य भेदाभ्युपगमात्।

यौगास्तु (नैयायिकवैशेषिकौ) द्रव्यत्वादिकं सामान्यविशेषमङ्गीकुर्वन्ति। द्रव्यं द्रव्यमित्यनुगतबुद्धिविषयत्वात् सामान्यं। गुणो न द्रव्यं कर्म न द्रव्यमिति व्यावृत्तिबुद्धिविषयत्वाद्विशेषः। तथैकमेव-द्रव्यत्वं जातिः सत्तापेक्षयाऽपरा, पृथिवीत्वाद्यपेक्षया च परा, इत्येकस्य परापरात्मकत्वमभ्युपगतम्। एवं च सामान्यविशेषात्मकत्वमेकस्य स्वीकृतम्। तथैव गुणत्वं कर्मत्वं सामान्यविशेष इति।

सौगता अपि मेचकज्ञानमेकमनेकाकारं प्रतिपादयन्ति। पञ्चवर्णात्मकं रत्नं मेचकं। तज्ज्ञानं चानेकप्रतिभासात्मकमेव चित्रज्ञानत्वविरोधात्। नीलपीतादिनानाकारज्ञानं हि चित्रज्ञानं न त्वेकाकारमेव, मेचकज्ञानमिदमित्यनुभवविरोधात्। इमानि मेचकज्ञानानीत्यनुभवप्रसङ्गाच्च। ततश्चैकानेकात्मकं चित्रज्ञानं सौगतादीनामभीष्टमेव।

मीमांसका अपि प्रमातृप्रमितिप्रमेयाकारमेकं ज्ञानं घटमहं जानामीत्यनुभवात् स्वीकुर्वन्तीत्यनयरीत्या मतान्तरेष्वनेकान्तप्रक्रियाऽनुभवसिद्धा वर्तत एवेति सर्वत्रानेकान्तशासनं जयति।

अहिंसातत्त्वम्

स्याद्वादनिरूपणानन्तरमधुना जैनाचारस्याधारभूतायाः अहिं-

माया विवेचनं क्रियते। हिंसायां प्रमादरूपायां हिंसा। ततो हिंसा-स्वरूपज्ञानमन्तरेणाऽहिंसायाः ज्ञानं न स्यात्। भावज्ञानं विनाऽभाव-ज्ञानासम्भवादिति तावद् हिंसायाः स्वरूपं कथयितुमुपक्रमे।

प्रमत्तयोगहेतुकप्राणव्यपरोपणलक्षणा हिंसा। प्रमत्तयोगो हि कषायसम्बन्धः। प्राणाश्च द्रव्यभावभेदेन द्विविधाः द्रव्यप्राणा पञ्चेन्द्रियाणि, मनोवाक्कायबलानि, श्वासोच्छ्वासश्चायुश्चेति दश। तत्रैकेन्द्रियस्य चत्वारो, द्वीन्द्रियस्य षट्, त्रीन्द्रियस्य सप्त, चतु-रिन्द्रियस्याष्टौ, निर्मनस्कपञ्चेन्द्रियस्य नव, समनस्कपञ्चेन्द्रियस्य दश द्रव्यप्राणा भवन्ति। भावप्राणास्तु चैतन्यात्मकाः। एतेषां यथा सम्भव व्यपरोपणाकरणं हिंसा। प्राणव्यपरोणं हि प्राणवियोगः। प्रमत्तयोगहेतुकत्वे सति प्राणवियोगस्य हिंसायाः लक्षणं। अन्यतराभावे हिंसाभावज्ञापनार्थमुभयमुपादीयते। प्रमत्तयोगाभावे केवलस्य प्राणवियोगस्य हिंसात्वाभावात्। तथा चोक्तं—

"वियोजयति चासुभिर्न च वधेन संयुज्यते"

अपरञ्च–उच्चालदम्मि पादे, इरियासमिदस्स णिग्गमठाणे।
आबादेज्ज कुलिंगो, मरेज्ज तज्जोगमासेज्ज ॥ १ ॥
णहि तस्स तण्णिमित्तो बंधो सुहुमोपि देसिदो समये।
मुच्छा परिग्गहोत्ति य अज्झप्पपमाणदो भणिदो ॥२॥

ननु प्राणव्यपरोपणाऽभावेऽपि प्रमत्तयोगमात्रेणैव हिंसा निरूप्यते—

मरदु व जियदु व जीवो, अयदाचारस्स णिच्छिदा हिंसा ।
पयदस्स णत्थि बंधो, हिंसामित्तेण समिदस्स ॥ १ ॥

इत्युक्तत्वादिति । नैष दोषस्तत्रापि भावलक्षणस्य प्राणव्यपरोपणस्य सद्भावात् । सकषायो ह्यात्मा पूर्वं स्वयमेवात्मनाऽऽत्मानं हिनस्ति । पश्चादन्येषां बधो भवेद् मा वा भवेत् ।

ननु जले स्थले चाकाशे जन्तुसद्भावादय लोकः सर्वत्र जन्तुमालाकुलः । तत्र चरन् साधुः कथमहिंसक स्यात् । सर्वत्र जीवव्यपरोपणासंभावनादिति चेन्न—आत्मत्वपरायणस्य साधोः कषाय योगाभावादहिंसकत्वमेव ।

किञ्च द्विविधाः प्राणिन , सूक्ष्माः स्थूलाश्च । ये सूक्ष्मास्ते विवर्जयितुमशक्याः, अदृश्यत्वात्तेषां । ते तु परस्पर संघर्षेऽपि न पीडामवाप्नुवन्ति । ततस्तेषां संघर्षेऽपि न परतः प्राणव्यपरोपणासंभावना । तेषां स्वायुषः क्षयात् स्वयमेवमरणात् । ये तु स्थूलास्त संयताचरणेन योगिना विवर्जयितुं शक्यन्ते इति न कदापि संयतात्मनो हिंसा सभवेत् । तस्यात्मपरिणतौ हिंसा प्रवृत्यभावात् कथ हिंसा स्यात् । पुण्यपापकारणं हि भावस्तथाचोक्त—

भावो हि पुण्याय मतः शुभः पापाय चाशुभ इति ।

अन्यच— विष्वग्जीवचिते लोके, क्व चरन् कोऽप्यमोक्ष्यत ?
भावैकसाधनौ बन्ध–मोक्षौ चेन्नाभविष्यताम् ।"

अत एव कृषिकार्येऽनिवार्य्यां हिंसां कुर्वतोऽपि कृषकाज्जलाश-

यतटे मत्स्यादीन् गृहीतुं सन्निषण्णो धीवरो जाले मत्स्यागमना-भावात्तानघ्नन्नपि बुधैः पापः प्रोक्तो जैनागमे, कृतहिंसासंकल्पत्वात्तस्य । कृषकस्तु न तादृशः, स हि केवलं कृषिकार्यमेव करोति । न तु जीवहिंसासंकल्पस्तस्य, अत एव यथाशक्ति तत्रागतान् प्राणिनो रक्षत्यपि । तथा चोक्तं—

आरंभेऽपि सदा हिंसां सुधीः सांकल्पिकीं त्यजेत् ।
घ्नतोऽपि कर्षकादुच्चैः पापोऽघ्नन्नपि धीवरः ॥

ततः प्राणव्यपरोपणं तदेव हिंसा भवति यदा तद्रागादिकषायप्रेरितं भवेत् । रागाद्यावेशाभावे तु प्राणव्यपरोपणं सत्यपि न हिंसा भवति, ततो भावहिंसैव मुख्यतो हिंसा प्रोच्यते । रागाद्यावेशे सति तु जीवो म्रियतां मा वा म्रियतां हिंसाऽवश्यमेव भवति । यदि कषायोऽस्ति निश्चितं हिंसा । आत्मनः सूक्ष्माऽपि हिंसा परवस्तुनिबंधना न भवति । अत एव कश्चन हिंसामकृत्वाऽपि हिंसाफलभाग्भवति तादृशपरिणामसद्भावात् । अपरो हिंसां कृत्वाऽपि हिंसाफलभाजनं न स्यात्, कषायरूपपरिणामाभावात् । एकस्याऽल्पाहिंसा परिपाकेऽनल्पं फलं ददाति तीव्रकषायत्वात् । अन्यस्य महाहिंसाऽपि परिपाके स्वल्पफला भवति मन्दकषायत्वात् । सैव हिंसैकस्य तीव्रफलं दिशति अपरस्य च मन्दं । सहकारिणोरपि मनुष्ययो रेकैव हिंसा फलकाले वैचित्र्यमादधाति । कदाचिद्धिंसामेकः करोति तस्याः फलभाजस्तु बहवो भवन्ति । कदाचिद् बहवो हिंसां विदधति, हिंसाफलभाक्त्वेक एव भवतीत्याद्यनेकानि वैचित्र्याणि हिंसाविषये

प्रपश्यता अनेन हिंस्यहिंसकहिंसाहिंसाफलानि तत्त्वेनावबुध्यात्र-स्वयमेव हिंसा त्याज्या । तथा चोक्तः—

हिंस्यहिंसकहिंसातत्फलान्यालोच्य तत्त्वतः ।
हिंसां तथोज्झेन्न यथा, प्रतिज्ञाभङ्गमाप्नुयात् ॥१॥
प्रमत्तो हिंसका हिंस्या, द्रव्यभावस्वभावकाः ।
प्राणास्तद्विच्छेदो हिंसा, तत्फलं पापसञ्चयः ॥२॥

मैत्रौषधिदेवतायज्ञातिथिभोजनार्थं कृताऽपि हिंसा हिंसैव तत्फलमपि तीव्रपापसञ्चय एव । तथापि हिंसां पापं विजानन्तोऽपि केचिद् विमुग्धाः प्रतिपादयन्ति यद् धर्मार्थं हिंसायां न कश्चिद् दोषो विद्यते ।

अपरे कथयन्ति—धर्मो हि देवताभ्यः समुत्पद्यते; अतो देवतार्थं विहिता हिंसा न पापाय ।

अन्ये च केचिद् व्याहरन्ति—पूज्यनिमित्तं कृतोऽजादीनां घातो न दोषाय, अतोऽतिथ्यर्थं सत्त्वसंज्ञपनमवश्यमेव विधेयम् ।

अपरे च जल्पयन्ति—बहुसत्त्वघातसमुत्पन्नादाहारादेकसत्त्वघातोत्थं भोजनं वरमिति महासत्त्वस्यैकस्य हिंसनं युक्तिसङ्गतम् ।

केचिच्च मन्यन्ते—एकस्यैव हिंस्रजीवस्य विनाशेन बहूनां रक्षा भवति, अतो हिंस्रजीवानां हिंसनमवश्यमेव कर्तव्यमिति, अथवा बहुजीवघातिनोऽमी हिंस्रा जीवन्तो गुरुपापं समुपार्जयन्ति तेषां वधोऽनुकम्पैव तदुपरीति वदन्ति ।

केचित्—ये जीवा बहुदुःखिनः सन्ति तेषां वध एव तद्दुःखमुक्तिरिति, अथवा जीवानां सुखप्राप्तिहेतुमेव सुखिनो हन्तुः सुखावबोधात् सुखिन एव तिष्ठन्तीति समामनन्ति ।

केचित्—समाधिस्थितस्य गुरोः सुधर्माभिलाषिणा शिष्येण शिरसः कर्त्तने स परब्रह्मावाप्नोतीत्यवश्यमेव तच्छिरः कर्तनीयमित्यूहते ।

केचित्—यथा घटविनाशे घटे स्थितमाकाशं महाकाशं स्वाभिलषितं देशं गच्छति तथैव शरीरविनाशे तत्स्थित आत्मा ततो निःसृत्य मोक्षायोग्यं स्थानं गच्छतीति शरीरहनने न कश्चन दोष इति वदन्त्यपि स्वार्थपरायणाः भाषन्ते ।

केचित्—यदि कश्चन बुभुक्षया मरणासन्नो भोजनार्थमायाति तर्हि तद्रक्षणबुद्ध्या स्वशरीरमांसदानमपि धर्माय जायत इति निगदन्ति ।

इमे च सर्वेऽहिंसाभासा एव न त्वहिंसा । एतेषां स्वतोहिंसात्मकत्वादननुकूलत्वाच्च । न च कदाप्यहिंसा हिंसाजन्या संभवेत । यस्मै कस्मैचित् प्रयोजनाय येनकेनाऽपि प्रकारेण कृतं जीवहननं हिंसैव । न च तत्कोऽप्यहिंसां कर्तुं शक्नुयात् ।

हिंसा द्विविधा, सांकल्पिकी असांकल्पिकी च । मनसा वाचा कर्मणा कृतकारितानुमोदनैश्च सङ्कल्पात् या हिंसा क्रियते, सा सांकल्पिकी । हिंसासंकल्पजन्यत्वात् । हिंसासंकल्पाभावेऽपि या गृहिणोऽनिवार्या हिंसा भवति साऽसांकल्पिकी । सा च त्रिविधा—आरम्भजन्या, उद्योगजन्या, विरोधजन्या चेति । पञ्चसूनास्तु गृहनिर्माणाः

दिषु च या गृहस्थस्याऽनिवार्य्या हिंसा सा ऽऽरम्भजन्या। जीविकोपायस्वरूपन्यायानुकूलोद्योगजन्या द्वितीया। इतराक्रमणे स्वस्वकीय रक्षार्थं याऽनिवार्य्या हिंसा जायते सा विरोधजन्या। आसु चतसृषु हिंसासु गृही केवलां सांकल्पिकीं हिंसां प्रत्याख्याति। अपरास्तिस्रस्तु तज्जीवनोपयोगित्वान्न हातुं शक्यन्ते गृहावस्थापर्यन्तम्।

इमे चत्वारो हिंसाया भेदा गृहस्थापेक्षया। मुनिजीवने तादृशा भेदासंभवात्। यस्याऽऽत्मानं विहाय न किमपि स्वं स्वकीय वा विद्यते स किमर्थमारंभमुद्योगं विरोधं वा कुर्यादिति स सर्वहिंसाविनिवृत्तः सर्वंसहश्च। काञ्चनाश्मशत्रुमित्रनिन्दाप्रशंसादिसमवृत्ति साधु. पूर्णतोऽहिंसकोभूत्वा चलति भाषते, आहरति, आदत्ते, निक्षिपति, उत्सृजति, शेते, निषीदति, सहते वा।

गृहस्थस्तु परित्यक्तहिंसासकल्प आरभोद्योगादिषु हिंसामपरित्यजन्नपि न कदाप्येतेषु व्यर्थां हिंसां करोति। वस्तुतो हिंसाया अघहेतुत्वात्। स अल्पारभपरिग्रहे सन्तुष्टो निवार्य्यां हिंसामवश्यमेव निवारयति। वह्वारभपरिगृहवांस्तु नादर्शगृहमेधी। तादृशो हिंसाया वैपुल्यात्। एतादृशहिंसाया अभावस्वरूपाऽहिंसा ऽऽचरणार्हा।

न च हिंसासंवलितं किञ्चिदनुष्ठानमाचारो वा धर्माय। जैनाचारस्येयमेव विशेषता यत्तत्राल्पापि हिंसामात्रा न विषह्या तस्या अधर्मरूपत्वात्। धर्मस्याहिंसालक्षणत्वात्। तथा चोक्तमहिंसाप्रशंसायाम्—

श्रूयते सर्वशास्त्रेषु सर्वेषु समयेषु च ।
अहिंसालक्षणो धर्मः तद्विपर्यश्च पातकम् ॥१॥

अहिंसैव जगन्माताऽहिंसैवानंदपद्धतिः ।
अहिंसैव गतिः साध्वी श्रीरहिंसैव शाश्वती ॥२॥

अहिंसैव शिवं सूते दत्ते च त्रिदिवश्रियम् ।
अहिंसैव हितं कुर्याद् व्यवसनानि निरस्यति ॥३॥

परमाणोः परं नाल्पं न महद् गगनात्परम् ।
यथाकिञ्चित्तथा धर्मो नाहिंसालक्षणात् परम् ॥४॥

तपःश्रुतयमज्ञानध्यानदानादिकर्मणाम् ।
सत्यशीलव्रतादीनामहिंसा जननी मता ॥ ५ ॥

अहिंसैकाऽपि यत्सौख्यं कल्याणमथवा शिवम् ।
दत्ते तद्देहिनां नायं तपः श्रुतयमोत्करः ॥ ६ ॥

जन्मोग्रभयभीतानामहिंसैवौषधिः परा ।
तथाऽमरपुरीं गन्तुं पाथेयं पथि पुष्कलम् ॥ ७ ॥

किन्त्वहिंसैव भूताना मातेव हितकारिणी ।
तथा रमयितु कान्ता विनेतुं च सरस्वती ॥ ८ ॥

किं न तप्तं तपस्तेन किं न दत्तं महात्मना ।
वितीर्णमभयं येन प्रीतिमालम्ब्य देहिनां ॥ ९ ॥

यथा यथा हृदि स्थैर्यं करोति करुणा नृणाम् ।
तथा तथा विवेकश्रीः परां प्रीतिं प्रकाशते ॥ १० ॥

यत्किंचित् संसारे शरीरिणां दुःखशोकभयबीजम् ।
दौर्भाग्यादिसमस्तं तद्धिंसा सम्भवं ज्ञेयम् ॥ ११ ॥

शान्त्यर्थं देवपूजार्थं यज्ञार्थमथवा नृभिः ।
कृतः प्राणभृतां घातः पातयत्यविलम्बितम् ॥१२॥

हिंसैव दुर्गतेर्द्वारं हिंसैव दुरितार्णवः ।
हिंसैव नरकं घोरं हिंसैव गहनं तमः ॥ १३ ॥

सौख्यार्थे दुःखसंतानं मंगलार्थेऽप्यमंगलम् ।
जीवितार्थे ध्रुवं मृत्युं कृता हिंसा प्रयच्छति ॥१४॥

अन्यच्च—

एसा सा भगवई अहिंसा जासा भीयाणं पिव सरणं ;
पक्खीणं पिव गगणं, तिसीयाणं पिव सलिलं,
खुहियाणं पिव असणं, समुद्दमज्झेव पोयवहणं,
चउप्पयाणं व आसमपयं, दुहट्ठियाणं च ओसहिबलं
अडविमज्झेवसत्थगमणं एत्तो विसिट्ठतरिगा अहिंसा ।

अन्यच्च—अहिंसा भूतानां जगति विदितं ब्रह्म परमम् ।

वस्तुतोऽहिंसा भगवती । अनयैव मनुष्यस्य सर्वा आपदो विनश्यन्तीतीयम् समुपास्या नित्यमात्महितेप्सुभिरिति ।

जातितत्त्वमीमांसा

मुक्तेरव्यवहितकारणस्य रत्नत्रयस्यादिमं सम्यग्दर्शनं जात्याद्यहंकाराभावे न भवतीति जातिविषये किञ्चित् प्रस्तूयते ।

जातिर्हि सदृशपरिणामात्मिका। अव्यभिचारिणा सादृश्येनैकीकृतार्थात्मकत्वात्तस्याः। एतल्लक्षणापेक्षया कर्मसिद्धान्तानुसारेण तु पञ्चैव जातय एकेन्द्रियाद्याख्याः। मनुष्यत्वपशुत्वप्रभृतयो वा भवन्तु जातयः। किन्तु ब्राह्मणक्षत्रियादिजातिभेदकल्पनं ह्याचारमात्रभेदेन संजात। वस्तुदृष्ट्या तु न काचिद् ब्राह्मणीयाऽन्या वा नियता तात्त्विकी जातिरस्ति। ब्राह्मणक्षत्रियवैश्यशूद्राणां चतुर्णामपि तत्त्वतः एकैव मानुषी जातिराचारेण तु तत्र भेदकल्पना सम्भूता। तथा चोक्तमार्षैः—

मनुष्यजातिरेकैव–जातिनामोदयोद्भवा।
वृत्तिभेदाहिताद् भेदात्–चातुर्विध्यमिहाश्नुते॥
ब्राह्मणा व्रतसंस्कारात्–क्षत्रिया शस्त्रधारणात्।
वणिजोऽर्थार्जनान्न्याय्यात् शूद्रान्यग्वृत्तिसंश्रयात्॥

जातिरेषा गुणैः सम्पद्यते गुणाध्वंसैश्च विपद्यते। जातिर्हि गुणैः गुणेन कर्मणा वा भवति न तु जन्मना। तथा चोक्तं पद्मचरिते—

तस्माद् गुणैर्वर्णव्यवस्थितिः

ब्राह्मण्य गुणयोगेन न तु तद्योनिसंभवात्।
चातुर्वर्ण्यं तथाऽन्यश्च चाण्डालादिविशेषणम्॥
सर्वमाचारभेदेन प्रसिद्धिं भुवने गतम्।
व्रतस्थमपि चाण्डालं तं देवा ब्राह्मणं विदुः॥

